रामकविविरचितं

सङ्गीतराघवम्

न हि ज्ञानेन सदृशं

UNIVERSITY OF MYSORE

Oriental Research Institute, Mysore
1980

ORIENTAL RESEARCH INSTITUTE SERIES No. 131

SAṄGĪTARĀGHAVAM
(RĀMĀṢTAPADI)
OF
RĀMAKAVI

General Editor
DR. G. MARULASIDDAIAH, M.A., Ph.D.
Director, Oriental Research Institute, and Professor and Head
Department of Sanskrit, Manasagangotri
University of Mysore, Mysore

Editor
H. SHANKARGANAPATHI PHATAK, M.A.
Siromani Vidwan, G. D. Art
Research Assistant
Oriental Research Institute, Mysore

ORIENTAL RESEARCH INSTITUTE
UNIVERSITY OF MYSORE, MYSORE, 1980

First Edition 1980

Copyright : ORIENTAL RESEARCH INSTITUTE, MYSORE

Price: Rs. 9-50

University Printing Press, Mysore

प्राच्यविद्यासंशोधनालयग्रन्थमाला - १३१

श्रीरामकविविरचितं

सङ्गीतराघवम्

(रामाष्टपदी)

प्रधानसम्पादकः

डा. जि. मरुलसिद्धय्यः

निर्देशकः, प्राच्यविद्यासंशोधनालयः, संस्कृतप्राध्यापकः, स्नातकोत्तरविभागः

विश्वविद्यानिलयः मैसूरु

सम्पादकः

हेच्. शङ्करगणपति फाटक् एम्.ए.

शिरोमणिः, विद्वान्, जि. डि. आर्ट्

सहायकसंशोधकः

प्राच्यविद्यासंशोधनालयः, मैसूरु

प्राच्यविद्यासंशोधनालयः

मैसूरु विश्वविद्यानिलयः, मैसूरु-१९८०

प्रथममुद्रणम् – १९८०

आरक्षिताः सर्वेऽधिकाराः

मूल्यम् – रु ९-५०

आननालङ्करणम्—सम्पादकः

मैसूरु प्राच्यविद्यासंशोधनालयात् प्रकाशितम्
मैसूरु विश्वविद्यानिलयमुद्रणालये मुद्रितम् – १९८०

CONTENTS

Foreword	....	v
प्रस्तावना	....	vii
विषयानुक्रमणिका	....	xvi
सङ्गीतराघवम्	....	1–57
रागपट्टिका	....	58
पद-पद्यानुक्रमणिका	....	59
शुद्धिपत्रिका	....	65

FOREWORD

Saṅgītarāghavam of Rāmakavi is a Gītakāvya of tender love. It contains five cantos and twenty three Aṣṭapadis. Like the famous Jayadevā's Gītagovinda, there are more than twenty Gītakāvyas such as गीतगौरीपति, कृष्णगीत, गीतगिरीश, गीतवीतराग, गीतगङ्गाधर etc., of which Rāmakavi's Saṅgītarāghavam certainly excels others due to its style and lucid language.

Rāmakavi lived in the patranage of Dalvoy Devarāja (1734–1766 A.D.) of Śrīrangapattaṇa. Devarāja was the commander-in-chief in the Mysore army. Though there is no accurate reference to the birth place of Rāmakavi, yet he mentioned some names like, 'पेरिपुर' 'घनपुर' etc., in his Kāvya. So he may belong to Piriyāpatṇa of Mysore District.

No doubt Rāmakavi was genius. Though he imitates Jayadeva's Gītagovinda, he proved some originality and skill in poesy. His contribution to Sanskrit literature is vivid and unforgettable.

Just as दशावतारप्रस्ताव in the beginning of Gītagovinda, in the beginning of the present work also we have,

> नाभिसरोजपुटे जनयसि विश्वसृजं
> सकलचराचरसमुदयबीजम् ।
> राघव। धृतकारणरूप।
> जय रघुनाथ! हरे! etc.,

gives the some and substance of the Rāmāyaṇa, which runs in twenty verses.

Rāmakavi shows his indebtedness to Jayadeva and he sincerely appeals the learned scholars for recognizing his Kāvya. He writes,

लोके जयत्यपि परं जयदेवगीते
का ते कृतेर्विरचनेति न जात्ववज्ञा।
गम्भीरनादमभिगर्जति वारिवाहे
केकारवं न कुरुते किमयं मयूरः॥

We find here the humility of Rāmakavi as found in Kālidāsa.

Sri H. Shankarganapathi Phatak Senior Research Assistant of O.R.I. has nicely edited this work with an exhaustive introduction. It is hoped that the present work will be welcomed by both Sanskrit and Kannada Scholars.

I am happy that the Mysore University authorities and the Director of University Printing Press have shown sufficient encouragement to bring this work into limelight. I request the public to receive this book.

Dr. G. MARULASIDDAIAH
Prof. & Head of the, Dept. of P. G. Studies in Sanskrit &
DIRECTOR
Oriental Research Institute University of Mysore
MYSORE

प्रस्तावना

गेयगुणवत्यां काव्यपङ्क्तौ जयदेवकविविरचितस्य गीतगोविन्दस्य स्थानं पावनं नितान्तरमणीयं च वर्तते। तदनुकारीणि बहूनि काव्यान्यायत्यां ललितकोमलकान्तपदावल्यनुसरणेन साहित्यलोके प्राशस्त्यं जनादरणीयत्वं चाभजन्त। अक्षरच्छन्दोनिबद्धानां पद्यकाव्यानां काव्यधर्ममनुसृत्य सत्यपि स्थानविशेषे, गेये सुकरता लालित्यं वा मात्राच्छन्दस्स्विव न लभ्यते। अत एव गेयगुणवन्ति गीतगोविन्दादीनि, पद्यकाव्यजाते झटिति सहृदयानां मनांस्याकर्षन्ति। अत्र वस्तुविशेषः रसश्च साहाय्यकमाचरति। तत्र शृङ्गारस्य गानस्य च परस्परं मेलनेन निरतिशयशोभाभाजनत्वं श्रुतिसुखकरत्वं चासाद्य गेयशृङ्गारकाव्यानि सुवर्णसुमनांसि सुगन्धसम्पत्तिरिव कामप्यनिर्वचनीयां शोभां सम्पादयन्ति। अतः एतादृशगेयकाव्यानि ललितमधुरबन्धुरशब्दसन्दोहबन्धेन तत्तत्समयोद्दिष्टरागविशेषसंयोजनेन च चतुरसहृदयचित्तानि चारुतरमावजयन्तीति नैतच्चित्रम्।

गीतगोविन्दस्य चारुतां सहृदयहृदयावर्जकं गुणं च मनस्सु निदधानास्तदुत्तरकालीनाः नैके कवयः तत्प्रतिबिम्बभूतानि बहूनि काव्यानि रचयामासुः। [1]श्रीमद्भिः एम् कृष्णमाचार्यैः रचितायां गेयकाव्यपट्टिकायां प्रायो विंशतिप्रबन्धाः, 'गीतगौरीपति' 'गीतगिरीश' 'गीतवीतराग'प्रमुखाः जयदेवग्रन्थानुकारिणः दृश्यन्ते। [2]अन्यच्च गेयकाव्यं श्रीश्यामरामकविरचितं गीतपीतवसन'मिति प्रयागतः प्रकाशितं नूतनमिति ज्ञायते।

अमुमेव पन्थानमनुसृत्यारचितः सङ्गीतराघवाख्यः गेयप्रबन्धविशेषः। गीतराघव'मिति नाम्ना त्रयः प्रबन्धाः श्रूयन्ते। त्रयोऽपि भिन्नभिन्नकविरचिताः। तत्रैको रामकविनिर्मितः 'गीतराघवं' 'सङ्गीतराघवं' 'रामाष्टपदी'ति एक एव नामत्रयेण विद्यमानोऽत्र विदुषां ललितामलकरकमलतलमध्यास्त इदानीम। अन्यौ द्वौ हरिशङ्कर—प्रभाकरकृतावित्येतावन्मात्रं तावधिकृत्य जानीमः।

---

[1] History of Classical Sanskrit Literature pp. 343-344.

[2] 'गीतपीतवसनम्' by श्यामरामकविः। सम्पादकः—श्री प्रभातशास्त्री। देवभाषाप्रकाशनम्, दारागंज—प्रयागः। १९७४.

सङ्गीतराघवम्

इयं कृतिरपि शैल्या, वस्तुना रागसंयोजनरीत्या च जयदेवस्य गीतगोविन्दमनुकुरुतेऽलम्। परन्त्वत्र ललिततराखण्डपदषण्डगुम्फनचातुरीं स्वकीयामेव प्रदर्शयन्नसौ कविः सत्यप्यनुकारित्वे, आत्मनः वैदुषीमपि समग्रेऽपि काव्ये प्रदर्शयतीति कवेरिदं वैशिष्ट्यम्। अनुकारिष्वपि ग्रन्थेषु कविभिः स्ववैदग्ध्यमुचितया रीत्या प्रदर्शितं सत प्रबन्धानां बन्धसौभाग्य-सौन्दर्यं विवर्धयेत, प्रबन्धॄणां च विमलं यशो दिक्षु विदिक्षु च वितनुयात्। अनुकरणमात्रेणैव कवयः कविगणगणनावसरे कनिष्ठस्थानभाजः स्थानमेवाल-भमाना वा तिष्ठेयुरिति शङ्का तु वृथैव। यतो मेघदूतानुकारिणो बहवः सन्देशग्रन्थाः कालिदासोत्तरकविरचिता अद्यापि साहित्यक्षेत्रे स्थानमुत्तमं सम्प्राप्य राजन्त एव।

प्रकृतग्रन्थस्य 'सङ्गीतराघवं' 'गीतराघवं' तथा 'रामाष्टपदी' ति त्रीणि नामानि मातृकायां लभ्यन्ते। परन्तु मातृकायामुपलभ्यमानायां सर्गान्तपुष्पिकायां 'सङ्गीतराघव' मिति नामैव प्रथितमस्ति। अत एतच्छैल्यनुबद्धानां गीतादिमतो नाम्नः सत्वेऽपि 'सङ्गीतराघव' मित्येवास्य सूक्तं नामधेयमिति मतमस्माकम्।

कथासारः

प्रथमसर्गे :—

लोककण्टकस्य लङ्काधिपते रावणस्य वधानन्तरमयोध्यां प्रतिनिवृत्या-कण्टकं साधुविद्वज्जनालङ्कृतं राज्यं सुखेन परिपालयन् जातु श्रीरामः जनकात्मजया साकं वासन्तिक्यां राकारजन्यां निबिरीसे सरयूतीरोल्लसिते सुगन्धबन्धुरकुन्दकुमुदकल्हारादिभिः परिवृते फुल्लोद्याने विहारसुखमनुभवन्नेव लीलाविनोदार्थं क्वचिद्गहने कुञ्जेऽन्तर्हितो भवति। स च सुदूरं गतस्तत्रस्थेन पल्लवमञ्जरीपुष्पफलभूषितेन लतासन्दोहेन साकं विहरन्नेव तल्लीनो भवति। अस्मिन्नवसरे प्रेयसो वियोगं क्षणमप्यसहमानां सीतां प्रति सवयसी शुको नाम्नी दूरस्थं श्रीरामं दर्शयन्ती तस्य चेष्टां तस्यै दर्शयति।

विरहिसुदुःसहायां वासन्तिक्यां निशीथिन्यां मन्दमन्दतरं बहति, चन्दन-सुगन्धस्फीते मलयपवने अन्याङ्गनास्विव लतास्वासक्तस्य दाशरथेश्चेष्टितं सीतायै नितान्तं दुःखकरं भवति। किमपि ध्यायन्निव मनसा, कामपि वहन्निव हृदयेन, सः कामपि मञ्जुलतां चुम्बति, कामपि कल्पलतामाकुलया

दृशा पश्यति, कामपि घनस्तबकवतीमालिङ्गति, अन्यां कामपि चाटुशतैरनुवदति च। एवं व्यग्रमनाः मदनपरायत्तचित्तवृत्तिरिव उन्मत्त इव च चरति। एवं शृङ्गारिणोऽयोध्यापतेश्चरितं सखीदर्शितं सीतायाः कृतेऽसहनीयं भवति।

द्वितीयसर्गे :—

किसलयकरादिभिः वरवर्णिनीसवर्णाः लतावनिताः गुणग्रामं राममेवं कलयन्ति। इतोऽवनिजा समुज्वलन्मदना मोहावेशात् सखीनिकटे श्रीरामविषयकमभिलाषं प्रकटयति। जयलक्ष्मीलोले राघवे भूयः आत्मनः सङ्गो भवेत्कथमिति तया सार्धं चिन्तयति। प्रायो दाशरथिरात्मापराधादकारणकोपाद्वा सूदूरं गतो भवेदिति तं सविनयं समाधाय समानेतुं सखीं प्रार्थयति।

तत्र च पुष्पापचयादिविभ्रमं विहाय, वने कुत्रापि जानक्याः स्थितिमजानानः रघुकुलावतंसः तद्विषयिणीं महतीं चिन्तां मनसि वहन् सरयूतीरे कालं नयति। वियोगजनितदुःखदूनमनाः मनुकुलकेसरी अनागसमात्मानं परित्यज्य कुतो वा गता भवेज्जानकीति बहुविधं मनसि तपन् तया विरहितं मलयानिलादिकं निष्फलमित्येव मनुते। वियति विलसन्तं विधुमपि पार्विकं, दहन्तं चण्डांशुकल्पं भावयति। कुसुमेषुप्रेषितान् संफुल्लबाणानपि खरादिदनुजकरगलितनिशितसायकसन्तानमिव कलयति। लावण्यतरङ्गिणीं तां वैदेहीं विनाऽऽत्मनस्तापापनोदने शक्तमन्यदपश्यन् किमपि राघवः तामेव चिन्तयन् तामेव मुहुर्मुहुः ध्यायन् कामात्ततापातुरो भवति।

तृतीयसर्गे :—

सरयूतीरे विरहानलदूयमानमानसं दशरथनन्दनं प्रति जानकीसखी जानक्या अवस्थां निरूपयति। सा सखीसंनिधानमपि व्यालीसंनिधानमिव तिरस्कुरुते। उत्पलमालामग्निमालामिव भावयति। करगतं लीलाकमलमपि हालाहलधिया पश्यति। पदात्पदमपि चलितुं न पारयति। चन्दनबिन्दुस्तस्यै ज्वलनशकलो भवति। राकेन्दुरुष्णरश्मिरिव भाति। सा अविरतं रामाननचन्द्रमसं स्मरन्ती, तस्य चरितानि गायन्ती, तन्नामसहस्रं जपन्ती, विह्वला भवति। आत्मानं विना जीवितुमप्यशक्नुवन्तीं सीतां, सखीमुखात् राघवः श्रुत्वा तामानेतुं सखीं प्रेषयति। सा राघवेणानुभूयमानां विरहव्यथां सीतायै निवेदयति। तेन साकं रन्तुं तां प्रेषयति।

लीलागारमुपेत्य सीता रामागमनकालमेव निरीक्षमाणा कालं यापयति। रामविरहं क्षणमपि सोढुमशक्नुवाना सा क्वापि लताकुञ्जे पयोधौ मीनेव लीना भवति।

चतुर्थसर्गे—

विरहिसन्तापदायके चन्द्रमस्युदिते सति निशि पूर्वस्यां दिशि, सीतापि पुष्पधन्वनो बाधामसहमाना सामान्यस्त्रीरिव तपति। शीतकिरणं, मलयसमीरं, पिकविरुतं लीलाकमलं च मनोदुःखदं निन्दति। कुतो वा नागतो राघव इति सा विचिकित्सन्ती, कदापि मृगयारसिको वने तिष्ठेत्। अथवा मत्प्रतिमार्गणार्थं लङ्कामेव गतो भवेत्। उत मदर्थं पुष्पावचयव्यग्रश्चिरयेत इति नैकविधसन्देहसन्दोहग्रस्ता प्रेयसा सार्धं सख्यागमनमेव निरीक्षमाणा तिष्ठति। ततश्च राघवं विनैवागतामेकाकिनीं वयस्यां दृष्ट्वा जानकी 'नूनं मे पतिः विजयरमयैव साकं रमते यतोऽद्यापि नागतः' इति तस्याः विजयवधूट्याः लावण्यादिकमात्मनोऽप्यधिकं भवेदिति शङ्कते। सा सखीं प्रति कथयति। हला! एतावदवधि लोके रूपगुणादिभिरहमेव वरिष्ठा इति यासीन्मम मतिः साद्य निरस्ता। सा विजयरमा मदधिकरूप-सौभाग्यशालिनी भवेत्। परं स्वान्त एव सर्वदा समाकलयतीं मां मत्प्रेयान्नैवेहते इति अहो कीदृङ् निर्दयोऽस्ति मम पतिः। वयस्ये! यथा कथमपि दशवदनद्विरदकुम्भकेसरी मे मनोगुहाशयो भवत्विति आकाङ्क्षे। इति सीता अन्यालोलुपं रामं मनसि समाकलय्य निर्विण्णा भवति।

पञ्चमसर्गे—

रात्रिजागरणानन्तरं विजयरमापरिणीतं कथमपि समागतं नाथं निरीक्ष्य सीता मानिनी किमपि नैव जगाद। राघवो मानापनोदनं चिकीर्षुः सीतां नैकविधेन प्रार्थयते। परं सा अन्यस्त्रीसङ्गल-क्ष्यीकृतानि चिह्नानि राघवाङ्गे प्रदर्शयन्ती विजयेन्दिरानुगमनविषये प्रश्नयति। अथ मध्यवर्तिनी वयस्या सीतामाह। देवि! वर्तमानोऽयं वसन्तसमयः भर्तापि ते त्वय्यनुरागमयः। अनुचितस्ते मानोऽत्र। अनुसर प्रेम्णा ते प्रेयांसं राघवम्। रमय तेन सह मनोऽभिलषितान् कामान्। इति।

मधुसारतोऽपि मधुरतरं सखीवाक्यं सीतायै श्रवणरुचिरं न भवति। दाशरथिः स्वयमेव कुञ्जान्तःस्थितां सीतां परमनुनेतुं यतते। परन्तु मानिनी मैथिली न कथमपि विमानिनी भवति। सा भूयोऽपि राघवापराधमेव उद्घाटयति।

अथ पुनरपि रामः सीतां मधुरवचोभिः सान्त्वयन्, अनुनीय नितरां, निकुञ्जान्तः प्रविशति। सखी सीतां पुनरपि राघवमनुसर्तुं तत्प्रेमसफलतां सम्पादयितुं च उपदिशति।

एवं सखीकृतबहूपदेशा सम्पादितसकलविधवेषभूषा सा रामयोषा तरसा प्रियान्तिकं गच्छति। सा निकुञ्जे प्रियमयोध्यापतिं प्रेमार्द्रया दृशा निरीक्षते। अत्र स तस्यै सुन्दरतमो दृश्यते। प्रियास्यं प्रेम्णा प्रकामं पश्यन्त्याः जनकनन्दिन्याः नेत्राभ्यां आनन्दाश्रुबिन्दवो निस्सरन्ति। कुञ्जान्तः स्थिताः जानकीसख्यः विहारव्याजमग्रेकृत्य बहिर्निस्सरन्ति। उत्पन्नशृङ्गारयोः सीताराघवयोः सरय्वास्तीरे तत्रानघः पञ्चसायकसमरः सुचिरं वर्धते।

काव्यविषये—

अस्याधारभूते गीतगोविन्दाख्ये महाकाव्ये द्वादश सर्गाः सामोददामोदरादिनामभिः ख्याताः सन्ति। तत्र चतुर्विंशतिप्रबन्धेषु अष्टपद्यः अन्तर्गताः भवन्ति। अष्टपदीति विशिष्य कस्यापि प्रबन्धभागस्य निर्देशः नास्ति।

सङ्गीतराघवे आहत्य पञ्चसर्गाः, त्रयोविंशतिसंख्याका अष्टपद्यश्च सन्ति। सर्गाणां विशिष्य किमपि नामधेयं नास्ति। अष्टपदीनां सर्वासामपि केवलमेकां विहाय रागाः भावं लक्ष्यीकृत्य निबद्धाः सन्ति। आहरिप्रभृतयः आहत्या द्वादश रागाः वर्तन्तेऽत्र। परं तु तालास्त्रयः केवलं आदावेव द्वयोरष्टपद्योः संयोजितास्सन्ति। अनन्तरं सर्वासामपि केवलं रागसंयोजनमात्रम्। क्वचित्क्वचिद्गेयभागेषु मात्रावैषम्यं यद् दृश्यते तत्प्रायः लेखकप्रमादकृतमिति यथाशक्ति तत्र तत्र सम्पादनसमये सुसंयोजितम्।

रामकविरत्र काव्ये सीताराघवौ नायकावुद्दिश्य स्ववैदुष्यविस्फुरत्प्रतिभाप्रदर्शनपूर्वकं तयोः स्वभक्त्यतिशयं प्रकटयति। अनेन कविरसौ श्रीरामभक्त आसीदिति भावयितुं शक्यते। कविनानेन स्वाश्रयदातुः देवराजस्य साम्यं राघवेण साकं विधाय काव्यमारचितम्। देवराजः सर्वत्र जयशीलः राघववत्स्वदारनिरतश्च प्रायो बभूवेति अस्मात्काव्यादवगम्यमानोंऽशः।

श्रीरामः रावणवधानन्तरं जयलक्ष्मीलोलः जातु घनोद्याने विहरमाणः कुञ्जे विनोदार्थं लीयते। जानकी पतिविरहमसहमाना सखीमाध्यस्थ्यमवलम्ब्य राममाह्वयति। परन्तु मानिनोः पुनस्संयोगस्तथा सुकरो न भवति।

उद्याने रात्रिजागरणानन्तरं समायातेन नायकेन सह सीतायाः पुनरपि संयोगः, दूतीसमयोचितसमागमानुसन्धानचतुराभिः वाग्भिः सफलो भवतीति, सीताराघवकेलिकौतुकमयं प्रबन्धं रामकविः गीतगोविन्दवद्रसमयं व्यरचयत्।

गीतगोविन्दे नैकगोपिकारतिलोलुपं शृङ्गारिणं दक्षिणं नायकं गोविन्दमुद्दिश्य वर्णितः कथाप्रसङ्गः, निबद्धानि 'श्लिष्यति कामपि चुम्बति कामपि' इत्यादि ललितमधुरशृङ्गाररसस्यन्दीनि पद्यानि वा तादृशे नायके सार्थकान्येव भवन्ति। परं तु न तादृशः श्रीरामचन्द्रः। सीतामेकाकिनीमेव धर्मपत्नीमिति मत्वा तया सार्धं धर्मं चरितवतो भगवतो रामस्य विषये वर्णितमितरस्त्रीलोलुपत्वं युज्यते कथमिति प्रश्नः साधुरेव। अत्र विषये कवीरामः, रामस्य व्रतभङ्गं, अनुचिताचरणं वा न वर्णयामास। अपि तु जयलक्ष्मीरिति कल्पितां नायिकां विरचय्य, तत्र रामो सकृन्मोहमापेति, तस्य शौर्यवीर्यादिकस्य पोषकतया वस्तु रचयित्वा राममेकपत्नीव्रतस्थमित्येवाभिरामं चकार। जयलक्ष्मीः, जयरमा, इति बहुभिर्नामभिः स्तूयमाना देवी, आहवेषु रणशूरेणावाप्तस्य विजयस्य सङ्केतभूता काचन व्यक्तिः। शूरं जयरमा विजयरमा वा वृणुते। धीरं मृतं युध्यन्तं अप्सरसः वृणुते इति धीरस्य धैर्यश्लाघापराः वाचः लोके विद्यन्त एव। एतेन राघवः अन्यासक्तोऽभवत्। मर्यादापुरुषोत्तमत्वं तस्य लुप्तमिति वा शङ्का दूरतोऽपास्ता। यतो विजयरमा युद्धे तमवृणुत अत एव सः विजयानन्दं मनसि स्मरन् तत्सुखं कदापि कुञ्जे मालालिङ्गनादिभिरन्वभवदिति राघवस्य शौर्यश्लाघाकरमेवैतदाचरणमिति तस्य सर्वोत्कृष्टता सर्ववीराग्रगत्वं चानेन द्योत्यते। अनुकूलनायकस्य भगवतो राघवस्य चारित्र्यं विभावयतः कवे रामस्य काव्यनिर्माणचमत्कृतिः नितरां श्लाघार्हा इत्यत्र नास्ति सन्देहः।

प्रकृतकाव्ये आदौ विंशतिसंख्याकाभिस्त्रिपदीभिः रामायणकथासारः चारु सङ्गृहीतोऽस्ति। उत्तरत्र राघवविरहवर्णनादिकं सुतरां गीतगोविन्दवच्चारु कान्तिभाक् भ्राजते। प्रसन्नगम्भीरां नृत्यत्पदगुम्भां ललितकोमलपदषण्डमण्डितां शैलीं उचितेषु स्थलेषु निबध्नतः कवेरामस्य पद्यकाव्यकर्मणि कीदृशी शक्तिरिति सन्त एव भावितात्मानः प्रमाणमत्र भवितुमर्हन्ति।

कविः—

अस्य गीतराघवाख्यस्य पद्यकाव्यस्य निर्माता रामकविः। स च आत्मानं श्रीरङ्गपट्टणस्य दलवायी (सेनानीः) देवराजस्य आश्रयभाजं निर्दि-

शति।[3] असौ दलवायी देवराजः मैसूरुराजवंशीय द्वितीयकृष्णदेवराजस्य सेनापतिः बभूव। द्वितीयकृष्णदेवराजस्य शासनकालः क्रिस्तीय १७३४-१७६६ तमवर्षपर्यन्तं आसीदिति इतिहासो वक्ति।

देवराजः अप्रतिहतबलः द्वितीयकृष्णदेवराजस्य दक्षिणो भुज इव निर्भीको दक्षः शौर्योदार्यादिगुणगणविख्यातो वदान्यश्चासीत्। स च श्रीरङ्गपट्टणस्य महतीं श्रियमपहर्तुं समागच्छन्तीं आर्काटनवाबस्यापारां सेनां तच्छिबिरमेव सबलं सहसा प्रविश्य सधैर्यं तां पशुमारं व्यदलयदिति इतिहासप्रसिद्धोऽशः।

[4]अस्य प्रबन्धस्य कर्ता रामकविः देवराजस्यास्थानकविः आश्रितकविर्वासीदिति निश्चप्रचम्। [5]अष्टपद्यन्तभागादसौ पेरिपुरस्थः तत्र लब्धजन्मा वेति ज्ञायते। तमिलु भाषायां 'पेरिय' इत्यस्य शब्दस्य महानित्यर्थः। तस्मिन्नेवार्थे कर्णाटकभाषायां 'पिरिय' इति शब्दः उपयुज्यते। 'घनपुरं' 'पेरिपुरं इति संस्कृततमिलु' भाषयोः शब्दौ महत्त्वार्थं निरूपयतः। अतोऽर्थानुसन्धानमनुसृत्यैतन्नगरं मैसूरुनगरसमीपस्थं कर्णाटकभाषायाः 'पिरियापट्टण' इत्याख्यं भवेदिति ऊह्यते। यद्यपीदानीमपि प्रसिद्धनगरलक्षणानि अत्र न दृश्यन्ते तथापि कथञ्चिदस्य नाम निपतितं भवेत्।

रामकविश्च तत्रैव लब्धजन्मा स्ववैदुषीप्रख्यापनार्थं राजाश्रयं वा इच्छन् श्रीरङ्गपट्टणमध्युवासेति निर्णेतुं शक्यम्। परन्त्वसौ कति वर्षाणि देवराजदलवायिनमाश्रित्य निनायेति न ज्ञायते।

द्वितीयकृष्णदेवराजस्य शासनकालः, क्रिस्तीय-१७३४-१७६६ वर्षमध्यवर्ती, ३२ वर्षपरिमितः। देवराजोऽप्यासीदस्य सेनानीः। असौ कविश्च

---

[3] Mysore Gazetteer–Mysore State, Mandya District p. 40. 1967.

दलवायीति कर्णाटकभाषायां सेनापतेर्नामधेयम्। (Commander of Army)

[4] रघुपतिदासे रामकवीशे देवनृपालसमाजे। अष्टपदी-११
वाहिनीपतिदेवनृपसमाजे व्याहरति रामकविराजराजे। अष्टपदी-२१ सङ्गीतराघवम्।

[5] इति श्रीरामचन्द्रचरणराजीवराजहंसायमानमानसघनपुरनिवासिश्रीनरसिंहदेव-कुमाररामकविविरचिते सङ्गीतराघवे महाकाव्ये पञ्चमः सर्गः।
पेरिपुररामे सम्भृतकामे...। अष्टपदी १५

तमाश्रित इति क्रैस्ताष्टादशशतकस्य मध्यवर्ती कालः रामकवेरिति निःसंशयम्। तत्कालनिर्मिता सेयं सङ्गीतराघवाभिधाना कृतिः।

सम्पादनम्—

[6] मैसूरुविश्वविद्यानिलयप्राच्यविद्यासंशोधनालयग्रन्थभाण्डारे एतावत्पर्यन्तं अस्य ग्रन्थस्यैकैव प्रतिः समग्रतया लभ्यते। अनया संस्थया निर्मीयमानायां संस्कृतहस्तलिखितग्रन्थविवरणात्मकसूच्यामपि सङ्गीतराघवस्य समग्रद्वितीयमातृकाविषये सूचनं किमपि नास्ति। अत्र लभ्यमानः ग्रन्थः कर्णाटकलिप्यात्मकः प्रायः शुद्धः। तत्र तत्र भग्नोऽपि समग्रतया पठितुमर्होऽस्ति। [7]अन्या मातृका कर्णाटकलिप्या वर्तमाना असमग्रा। संशोधनकर्मणि तया प्रयोजनं विशेषतो नासादितम्।

ग्रन्थसम्पादनावसरे प्रायः अशुद्धपाठः संशोधितः। यत्र नितरामर्थानुसन्धानं दुःशकमभूत्तत्र मातृकापाठ एव लिखितः तदग्रे प्रश्नार्थकं चिह्नमपि प्रदत्तमस्ति। मातृकायां सर्वथा अशुद्ध इति दृष्टे पाठे स्वतन्त्रतया कविहृदयसंवादि पाठयोजनं[ ]एतच्चिह्नान्तर्वर्ति कृतम्। तथापि बहुषु स्थलेषु सन्देहोऽस्त्येव। आयत्यां विद्वांसः कुशाग्रमनीषिणः पुनरपि परिस्कुर्युरथवा प्रत्यन्तरलाभे सति पुनस्संस्करणप्राप्तौ अस्माभिरेव सन्देहाः निरस्ता भवेयुरिति मनीषा वर्तते।

संशोधनावसरे समुचितनिर्देशनादिभिरालोकं दर्शयित्वोपकृत्य प्रोत्साहं प्रदत्तवद्भ्योऽस्मत्संस्थानिर्देशकेभ्यः प्रो. डा. जि. मरुलसिद्धय्यमहोदयेभ्यः नितरां कृतज्ञोऽहम्।

---

[6] सङ्गीतराघवम्—S. B. 290 Size—17 x 21 cms. Pages, 1-38. Lines per page-11. Letters per page, 28 Approximate, Script-Kannada.

[7] सङ्गीतराघवम्—P. 5278/5 Size-37 x 3.5 cms. Pages, 1-4. Lines per page, 6. Letters per line, 75 Approximate. Script-Kannada.

अनेन काव्येन नन्दतां विदुषां कृतज्ञताततीः श्रीरामचन्द्रचरणराजीवराजहंसायमानमानसघनपुरनिवासिनरसिंहदेवकुमाररामकविवरेण्याय समर्पितास्सन्त्विति बुधमण्डलीं साञ्जलिं प्रणम्य कृतिमिमां तत्करकमलसम्पुटेषु समर्पयामि।

मैसूरु
१०–१०–१९८०
रौद्री, – आश्वीजशुक्लद्वितीया

इति विद्वज्जनविधेयः
एच्. शङ्करगणपति फाटक् एम्.ए.
शिरोमणिः, विद्वान्
जि. डि. आर्ट्
सहायकसंशोधकः I
प्राच्यविद्यासंशोधनालयः
मैसूरु

सङ्गीतराघवस्य विषयानुक्रमणिका।

प्रथमः सर्गः	पृष्ठम्
श्रीरामस्तुतिः	१
रङ्गपुरी[श्रीरङ्गपट्टण] वर्णनम्	१–२
कृष्णनृपालसेनानिवर्णनम्	२–३
कवेर्गुणकीर्तनम्	३
प्रबन्धारम्भस्तुतिः	४
प्रबन्धावतारः	४
अष्टपदी—१	५–९
अष्टपदी–२	१०–११
काव्यारम्भः-वसन्ते रामावस्थावर्णनम्	११
अष्टपदी–३	१२–१३
अष्टपदी–४	१४–१५
सर्गान्तमङ्गलम्	१५
द्वितीयः सर्गः	
अष्टपदी–५	१६–१७
अष्टपदी–६	१८–१९
सीतामपश्यतो रामस्य विरहव्यथावर्णनम्।	१९
अष्टपदी–७	२०–२१
तृतीयः सर्गः	
अष्टपदी–८	२४–२५
अष्टपदी–९	२६–२७
अष्टपदी–१०	२८
अष्टपदी–११	२९–३०
अष्टपदी–१२	३१
सर्गान्तमङ्गलम्	३२

चतुर्थः सर्गः

अष्टपदी-१३	३३-३४
अष्टपदि-१४	३६-३७
अष्टपदी-१५	३८
अष्टपदी-१६	३९-४०

पञ्चमः सर्गः

अष्टपदी-१७	४२-४३
अष्टपदी-१८	४५
अष्टपदी-१९	४७-४८
अष्टपदी-२०	५०-५१
अष्टपदी-२१	५२-५३
अष्टपदी-२२	५४-५५
अष्टपदी-२३	५६-५७

रामकविविरचितं

[1]सङ्गीतराघवम्

प्रथमः सर्गः

श्रीरामस्तुतिः

वैदेहीवदनाब्जवासरमणिर्वन्दारुचिन्तामणि-
र्विस्फूर्जद्रघुवंशमौक्तिकमणिः पृथ्वीशचूडामणिः ।
सोऽयं [2]सारचिरन्तनोक्तिरमणीसीमन्तजाग्रन्मणिः
पौलस्त्योग्रभुजङ्गगारुडमणिः पायाच्चिरं चिन्मणिः ॥ १ ॥

[3]कवेरकन्या विलसत्प्रवाहबाहायुगालिङ्गिततुङ्गसाला ।
श्रीलासिकानर्तनरङ्गशाला विराजते रङ्गपुरी विशाला ॥ २ ॥

रङ्गपुरी [श्रीरङ्गपट्टण] वर्णनम्

स्मितज्योत्स्नाप्राचीपरिमिलनहृष्य[4]द्विधुशिला
गृहेभ्यश्च्योतद्भिः प्रतिदिनमव[5]मवश्यानिकरैः ।

---

1 अस्यैव ग्रन्थस्य रामाष्टपदीति नामान्तरं दृश्यते । अस्मिन् ग्रन्थे सीतारामशृङ्गार-वर्णनात्मिकाः त्रयोविंशतिसंख्याकाः अष्टपद्यः सन्ति । जयदेवस्य गीतगोविन्दानु-कारिणोऽस्य ग्रन्थस्य सर्गास्तु पञ्चैव । गीतगोविन्दे तु द्वादश सर्गाः वर्तन्ते ।

2 सारचिरन्तनोक्तिः, वेदत्रयी सैव रमणी तस्याः सीमन्तो वेदान्त इत्यर्थः । तत्र जाग्रन्मणिः वेदान्तप्रतिपाद्यमानं परं ब्रह्म । अत्राशीरूपं मङ्गलम् । शार्दूलविक्रीडितं छन्दः ।

3 कवेरकन्या, कावेरी । सा पूर्वं कवेरमहर्षेः पुत्र्यभवदिति कथा स्कान्दे द्रष्टव्या । अत्र निर्दिष्टा पुरी रङ्गपुरीति नाम्नी मैसूरुनगरसमीपवर्तिनी 'श्रीरङ्गपट्टणा'ख्या ॥ उपजातिः छन्दः

4 विधुशिलागृहाणि, चन्द्रकान्तमणिनिर्मितगृहाणीत्यर्थः ।

5 अवश्यायनिकरो हिमसमूहः । अत्र श्लोके शिखरिणी छन्दः ।

पिधायैनं यस्यां नवमणिमयाकल्पकिरणै
र्दिवाचन्द्रप्रायं दिनमणिमकुर्वन्मृगदृशः ॥ ३ ॥

वदनेन्दुमण्डली सा जयति वधूनां विहारसौधेषु ।
धम्मिल्लडम्भराहुग्रस्ता पीतापि [1]निर्जरैर्यस्याम् ॥ ४ ॥

[2]शिरोगृहपरिस्फुरद्वर[3]मयूरनीलालका-
गवाक्षविपुलेक्षणास्तरलहारपारावताः ।
समुन्नतपयोधराचलधुरीणमध्याङ्कणा-
श्चलध्वजभुजा वधूरिव यदीय[4]हर्म्यावलिः ॥ ५ ॥

[5]श्रीवासुदेवचरणस्फुरदुत्तमाङ्गाः
शश्वद्वरश्रुतिदृशः सुनरेन्द्रगुप्ताः ।
आशीर्विमोक्षणपराः परिमुक्तभोगाः
राजन्ति यत्र खलु कुण्डलिनो द्विजेन्द्राः ॥ ६ ॥

कृष्णनृपालसेनानीवर्णनम्

पुरीमेतां ख्यातां जगति चिरमध्यास्य जगतीं
प्रशासत्यासत्यप्रसृमरयशाः कृष्णनृपतिः ।
यदीयस्सेनानीर्युधि [6]जयरमाश्लेषरसिको
वदान्यो गम्भीरो विलसति भुजो दक्षिण इव ॥ ७ ॥

---

1 स्त्रीणां वदनेन्दुमण्डलीमधुपाने निर्जराः युवान इति ज्ञेयम् । अत्रार्या छन्दः ।

2 शिरोरुह (ख) 3 मसर (क) 4 हर्म्यालयः (क)
शिरोगृहं प्रासादशिखरं तत्रस्था मयूरा एव हर्म्यावलीरूपायाः वध्वाः नीलालकाः इत्यर्थः । अत्र पृथ्वी छन्दः ॥

5 अस्मिन्पद्ये द्विजेन्द्रपक्षे वासुदेवचरणमूर्ध्वपुण्ड्रं, कुण्डलं कर्णाभरणमिति चावगन्तव्यम् । सर्पपक्षे वासुदेवचरणस्फुरदुत्तमाङ्गत्वं कालियस्य, कृष्णावतारे । द्विजेन्द्राः सर्पास्तेषां पूर्व अण्डरूपेण अनन्तरं कायरूपेण च द्विर्जातत्वात् । नरेन्द्रो विषवैद्यः । अत्र वसन्ततिलकं छन्दः

6 अत्र जयरमा जयलक्ष्मीरिति ज्ञेयम् । उत्तरत्र ग्रन्थेऽपि राघवस्य जयरमालोलुपत्वं तेन च सीताविषाद इति कृतिविरचयितुः सेनापतौ उदात्तः प्रेमविशेषः सूचितो भवति । शिखरिणी छन्दः ।

बाहा यस्य समस्तभूमिभरणे भोगीन्द्रभोगायते
विद्वन्मण्डलदैन्यतन्तुहरणे वेतण्डशुण्डायते[1] ।
प्रत्यर्थिक्षितिपालसैन्यजलधौ मन्थानशैलायते
सोऽयं तत्र चमूपतिर्विजयते श्रीदेवराजाभिधः ॥ ८ ॥

विबुधजनावनलोलः प्रतिभूभृत्पक्षदलनकरवालः ।
स्वस्त्रीविहरणशीलः स खलु चिरं भाति देवभूपालः[2] ॥ ९ ॥

कवेर्गुणकीर्तनम्

[3]श्रीजानकीपदरजःस्फुरितोत्तमाङ्गः
श्रीरामचन्द्रचरणाम्बुजमत्तभृङ्गः ।
श्रीदेवराजसुरभूमिरुहावलम्बः
श्रीमानिहास्ति पुरि रामकवि[4]र्विडम्भः ॥ १० ॥

विलासो यद्वाचामधरयति[5] मोचारसझरीं
सुधामप्याचामत्यतिमधुरताचारिमभरैः ।
स एष श्रीसीतापतिचरितसौरभ्यसुभगं
प्रबन्धं सानन्दं कलयति कवीनामिह मुदे ॥ ११ ॥

[6]लोके जयत्यपि परं जयदेवगीते
का ते कृतेर्विरचनेति न जात्ववज्ञा ।
गम्भीरनादमभिगर्जति वारिवाहे
केकारवं न कुरुते किमयं मयूरः ॥ १२ ॥

---

1 वेतण्डशुण्डोऽपिऽकमलनालतन्तुहरणे प्रसिद्धः । शार्दूलविक्रीडितं छन्दः ।

2 आर्या छन्दः ।

3 अनेन पद्येनायं कविः सीतारामभक्तस्तेनैव स्वेष्टदेवतास्तोत्ररूपि पद्यकाव्यं स्वभक्त्यतिशयप्रदर्शनार्थं व्यरचयदिति ज्ञायते ।

4 विडम्भो डम्भरहितस्सरल इत्यर्थः । वसन्ततिलका छन्द : ।

5 मोचारसझरी कदलीफलसारप्रवाहः रम्भाफलरसायनपूरो वा । चारिमभरः सौन्दर्यातिशयः । शिखरिणी छन्दः ।

6 जयदेवगीतं गीतगोविन्दकाव्यम् । असौ कविः गीतगोविन्दच्छानुसारेणैव इदं काव्यं निर्मम इति जनास्तस्मिन्नवज्ञां प्रकटयेयुरिति मत्वा स्वकाव्यस्योपादेयतां दृष्टान्तमुखेनोपपादयति । अवज्ञा न कार्येति शेषः । वसन्ततिलका छन्दः ।

प्रबन्धारम्भस्तुतिः ।

[1]इक्ष्वाकूणां कुलजलनिधेर्यस्स्वयं प्रादुरासी-
द्यस्यालोकैर्नवकुवलयश्रीभरोऽप्युल्ललास ।
ऋक्षावल्या भुवि परिवृतो लक्ष्मणोपास्यमानः
सोऽयं चन्द्रस्सुखयतु सदा मामकं हृच्चकोरम् ॥ १३ ॥

प्रबन्धावतारः ॥

श्रीरामे कमलेक्षणे कुसुमितारामे क्षणं लीलया
कस्मिंश्चि[2]द्घनकुञ्जके व्यवहिते सीता बभूवातुरा ।
पश्चात्तापमपोह्य सङ्गतवतोः पश्चात्सखीवाक्यतः
[3]सीताराघवयोर्जयन्ति सरयूतीरे मिथःकेलयः ॥ १४ ॥

---

1 कुवलयश्रीरित्यत्र रामपक्षे भूमण्डलशोभेति, ऋक्षावलीत्यत्र मर्कटापंक्तिरिति चार्थः। चन्द्र पक्षे लक्ष्मणा मृगरूपेण चिह्नेनोपास्यमान इति ज्ञेयम्। मन्दाक्रान्ता छन्दः ॥

2 राधामाधवयोर्जयन्ति यमुनाकूले रहःकेलयः इति गीतगोविन्दम् १-१ । शार्दूलविक्रीडितं छन्दः ।

3 द्घनकुञ्जके (ख)

अष्टपदी — १

मालवीरागेण गीयते । आदितालः अटतालो वा ।

[1]नाभिसरोजपुटे जनयसि विश्वसृजम् ।
सकलचराचरसमुदय[2]बीजम् ।
[3]राघव धृतकारणरूप
जय रघुनाथ हरे ॥ १ ॥

[4]कलशपयोधिगृहे कृतवानसि निद्राम्
सकलजगत्परिपालनमुद्राम् ।
[5]राघव धृतविष्णुशरीर
जय रघुनाथ हरे ॥ २ ॥

दशरथनृपजठरे त्वमसि जगत्पातुम् ।
लक्ष्मणभरतरिपुघ्नसमेतम् ।
[6]राघव धृतमानुषरूप
जय रघुनाथ हरे ॥ ३ ॥

[7]चरणसरोजदले वहसि कमपि रेणुम्
मुनिरमणीजनकत्वधुरीणम् ।
राघवाघनिवारणशील
जय रघुनाथ हरे ॥ ४ ॥

---

1 उत्तरत्र विंशतिगीतिकाभिः रामायणसारस्सङ्गृहीतः ।
2 रुचिरम् (क)   3 राघवाहत (ख)
4 कलश इव उदधिः मन्थानाधारत्वात् समुद्रः इति महाभारतम् ।
कलशपयोधिरिति कलसोदधे रूपान्तरम् ।
5 राघवाहत (ख)   6 राघवाहत (ख)
7 अत्राहल्याशापोद्धारप्रसङ्गः स्मर्यते ।

दलयसि [1]भूतपतेर्धनुरनुपमसारम्
मदकलकलभ इवाशु रसालम्।
[2]राघव धृतबालकरूप
जय रघुनाथ हरे ॥ ५ ॥

वहसि निजाङ्कतले अनिशं [3]किल सीताम्
हिमरुचिरमृतकलामिव[4] [शी] ताम्।
[5]राघव धृतकौतुकरूप[6]
जय रघुनाथ हरे ॥ ६ ॥

पथि परगतिरहितम् र[च] यसि भृगुतनयम्
निजगमनाय निरोधकमनयम्[7]।
[8]राघव धृतवैष्णवचाप
जय रघुनाथ हरे ॥ ७ ॥

[9]वनमवनाय सताम् प्रविशसि सकलत्रम्
निजपदकमलपरागपवित्रम्।
राघव धृततापसरूप
जय रघुनाथ हरे ॥ ८ ॥

[10]करलसदसिलतया विशसयसि विराधम्
सकलसुरासुरजनितविरोधम्।
राघव धृतभीषणरूप
जय रघुनाथ हरे ॥ ९ ॥

---

1 भूतपतिधनुः शैवधनुः। अत्र शैवधनुर्भङ्गप्रसङ्गः स्मर्यते।
2 राघवाहत (ख)
3 कलगीताम् (ख) 4 सीताम् (क) 5 राघवाहत (ख)
6 कौतुकरुपं, विवाहनेपथ्यम्। अत्र सीतारामयोः विवाहप्रसङ्गः स्मर्यते।
7 अनयो नयरहितः। अत्र वैष्णवधनुर्भङ्गप्रसङ्गः स्मर्यते।
8 राघवाहत (ख)
9 सतामवनायेत्यन्वयः। अत्रारण्यकाण्डकथाप्रसङ्गः स्मर्यते।
10 अत्रारण्यकाण्डगतो विराधवधप्रसङ्गः स्मर्यते।

[1]अतिचिरकृततपसम् कलयसि शरभङ्गम्
[2]स्वहृदयकृतमनसिजशरभङ्गम् ।
[3]राघव धृतपुण्यकलाप
जय रघुनाथ हरे ॥ १० ॥

[4]शमधनजननिवहे प्रणमसि कुम्भभवम्
करतलकलितपयोनिधिविभवम् ।
राघवात्तदिव्यायुधवृन्द
जय रघुनाथ हरे ॥ ११ ॥

[5]वनुभुवि शूर्पणखाम् रचयसि हृतनासाम्
प्रमुदितसुरगणकृतपरिहासाम् ।
[6]राघव घृतमोहनरूप
जय रघुनाथ हरे ॥ १२ ॥

खरदहनोऽपि परं शाम्यति भुवि साराम्
त्वयि जलदे वर्षति शरधाराम् ।
[7]राघव धृतवलरिपुचाप[8]
जय रघुनाथ हरे ॥ १३ ॥

पञ्चवटीनिलये काञ्चनमृगतृष्णाम्
[9]वहसि वनीपक इव भृशमुष्णाम् ।
राधव धृतचापलताङ्ग
जय रघुनाथ हरे ॥ १४ ॥

---

1 रामं दृष्टवा सशरीरं ब्रह्मलोकं गतस्य शरभङ्गस्यर्षेः कथाप्रसङ्गः स्मर्यते ।

2 सहृदयश्रित (क) 3 राघवाहृत (ख)

4 शमधनजननिवहस्तपस्विसमूहः । अत्र समुद्रपस्यागस्त्यस्य कथाप्रसङ्गः स्मर्यते ॥

5 नासिकायां कृत्तायां सुरगणहासपात्रं बभूव शूर्पणखेत्यत्र तत्प्रसङ्गः स्मर्यते ।

6 राघवाहृत (ख) 7 राघवाहृत (ख)

8 वलरिपुरिन्द्रः; तस्य चापः–इन्द्रधनुरित्यर्थः । अत्र खरवधप्रसङ्गः स्मर्यते ।

9 वनीपको याचकः । अत्र काञ्चनमृगानुसारिणो रामस्य पञ्चवटीकथाप्रसङ्गः स्मर्यते ।

[1]कपिमपि विपुलभुजं सकलयसि सलीलम्
वनभुवि भवदुपवाहनशीलम् ।
राघवाम्बुदनीलशरीर
जय रघुनाथ हरे ॥ १५ ॥

[2]शमयसि शक्रसुतं युधि निशितशरेण
हरिरिभपतिमिव नखशिखरेण ।
राघवाश्रितपालनशील
जय रघुनाथ हरे ॥ १६ ॥

[3]घटयसि धरणिधरैरधिजलनिधि सेतुम्
निखिलनिशाचरविदलनहेतुम् ।
राघव धृतहुतवहबाण
जय रघुनाथ हरे ।

[4]युधि दशवदनवधे कलयसि परमस्त्रम्
निजकिरणौघविभिन्नतमिस्रम्
[5]राघव धृतरौद्रशरीर
जय रघुनाथ हरे ॥ १८ ॥

[6]सपदि विमानवरे सपरिजनमयोध्याम्
प्रविशसि पुनररिपरिषदयोध्याम् ।
[7]राघव धृतदिव्यशरीर
जय रघुनाथ हरे ॥ १९ ॥

रामकवेर्भणितं रसयतु रसिकजनम्
सरसमिदं मृदुतरपदरचनम् ।
[8]राघव धृतबहुविधरूप
जय रघुनाथ हरे ॥ २० ॥

---

1 अत्र हनूमन्मैत्रीप्रसङ्गः स्मर्यते ।

2 अत्र वालिवधप्रसङ्गः स्मर्यते शक्रसुतो वाली । हरिरत्र सिंहः ।

3 अत्र पर्वतैः सेतुबन्धः कृत इति तत्प्रसङ्गः अग्न्यस्त्रेण समुद्रगर्वभङ्गप्रसङ्गश्च स्मर्यते ।

4 युद्धकाण्डे रावणवधप्रसङ्गः स्मर्यतेऽत्र । 5 राघवाहत (ख)

6 अत्र पुनरयोध्याप्रवेशप्रसङ्गः स्मर्यत इति एभिः पद्यैः सकलरामायणसारः सङ्गृहीतः । 7 राघवाहत (ख) 8 राघवाहत (ख)

अष्टपदी–१

स्रष्ट्रे पालयते जगन्ति, मनुजाकारं चिरं बिभ्रते
सीतामुद्वहते वने विहरते शिष्टान् मुनीन् रक्षते।
दुष्टान् संहरते कपीन कलयते सेतुं समातन्वते
[1]पङ्क्तयास्यं जयते पुरीं प्रविशते रामाय तुभ्यं नमः ॥ १५॥

॥ इति प्रथमाष्टपदी ॥

1 पङ्क्तयास्यो दशमुखः। अत्र स्थूलरूपेण रामकथानिरूपणं क्रियते। शार्दूलविक्रीडित छन्दः।

अष्टपदी — २

भैरवीरागेण गीयते। त्रिपुटतालः।

धरणिसुताधरचुम्बन धृतजृम्भण[1]।
स्मरशतकोटिविडम्बन जय जय राम विभो ॥ १ ॥

मणिमयहार धुरन्धर पृथुकन्धर
फणिपतिभोगसदृग्भुज जय जय राम विभो ॥ २ ॥

विलसदशीतगभस्ति [प्र] भानिभकौस्तुभ।
[2]जलधरश्रीलकलेवर जय जय राम विभो ॥ ३ ॥

करधृतकनकशरासन नतपोषण।
समरविजितखरदूषण जय जय राम विभो ॥ ४ ॥

मुकुरविडम्बकगण्डलसन्मणिकुण्डल।
मुखरुचिजितशशिमण्डल जय जय राम विभो ॥ ५ ॥

जलनिधिविभवविशोषण रिपुभीषण
[3]स्थिरपदनिहितविभीषण जय जय राम विभो ॥ ६ ॥

भृगुसुतगर्वनिबर्हण जितरावण।
अगणितगुणमणिभूषण जय जय राम विभो ॥ ७ ॥

---

1 गीतगोविन्दे सर्वत्र अस्यामष्टपद्यां प्रथमपादान्ते 'ए' इति वर्तते तच्च अतिहर्षद्योतकं, हे इत्यर्थे, रागपूर्त्यर्थं वेति गीतगोविन्दटीकासु सञ्जीविनीजयन्तीपद्यद्योतनिकाख्यासु वर्तते।
[गीतगोविन्दमहाकाव्यम। संस्कृतपरिषत् उस्मानिया विश्वविद्यालय हैदराबाद ७, 1969.]

2 जलधरश्रियं लातीति नीलदेघश्यामलोवर्णः।

3 स्थिरपदे लङ्कायामभ्यषेचयदित्यर्थः।

श्रीरामकविसमुदीरितं रसपूरितम् ।
चारुतरं [1]कुरुते हितम् जय जय राम विभो ॥ ८॥

॥ इति द्वितीयाष्टपदी ॥

[2]उल्लासप्रसरद्दरस्मितसुधाकल्लोलमुर्वीसुता
सँल्लापैकरसप्रसङ्गममरावल्यापि संसेवितम् ।
उल्लोलाङ्घ्रिपरागलेशकलिताहल्याघविध्वंसनं
फुल्लेन्दीवरवृन्दसुन्दरतनुं कल्याणरामं भजे ॥ १६॥

काव्यारम्भः—वसन्ते रामावस्थावर्णनम्

[3]वसन्ते सातङ्कं पतिविरहतापासहतया
चरन्तीं कान्तारे चकितहरिणीलोलनयनाम् ।
सदर्पं कन्दर्पप्रहितशरजालैरविरलैः
परिस्यूतां सीतां सविनयमभाणीत्प्रियसखी ॥ १७॥

1 कुरुशे (क)

2 कल्याणरूपः कल्याणकारको वा रामः। अत्र शार्दूलविक्रीडितं छन्दः।

3 अत्र गीतगोविन्दक्रमेण तृतीयप्रबन्धप्रारम्भः। अस्मिन् ग्रन्थे कर्त्रा प्रबन्धभेदाः न कृताः। अत्र शिखरिणी छन्दः।

अष्टपदी — ३

वसन्तरागेण गीयते

कुसुमितविविधलताशतसंवृतविततसुशीतलकुञ्जे
असमशरोज्ज्वलभल्लसमुल्लसत्पल्लवतल्लजपुञ्जे ॥ १ ॥

विहरति रघुपतिरिह हि वनान्ते
विकसितकुसुमपरागपरीमलपरिमिलदखिलदिगन्ते ।

[1][ध्रुवपदम्]

प्रमुदितकोकिलकलरवगौरवविभवलसदसमबाणे ।
विमलमरन्दझरी [2]निबिरीसपरीमलभारधुरीणे ॥ २ ॥

वनवनितादरहासविभासुरकेसरकुसुमकदम्बे ।
मनसिजराजसमाजपराजितपथिकवधूनिकुरुम्बे ॥ ३ ॥

कुसुमरसासवपानसमेधितमदकलमधुकरगीते ।
प्रसृमरसौरभविभवचउन्मलयानिलकम्पितचूते ॥ ४ ॥

[3]मदनमदावलनवरदनायितकैतकमुकुलकलापे ।
मधुकरतिमिरनिरासपरायणचम्पककोरकदीपे ॥ ५ ॥

सरसतमालसमूहघनाघनदर्शनमुदितमयूरे ।
स्फुरदरविन्दगलन्मधुशीकरशिशिरितमलयसमीरे ॥ ६ ॥

---

1 अत्र मूलग्रन्थे "पल्लवी' इति कर्णाटभाषायां ध्रुवपदस्यैव नामान्तरं विद्यते । ध्रुवपदं एकैकस्यापि पद्यस्यान्ते पुनः पुनरावर्तते ।

2 नीबिरीसः निबिडः ।

3 केतकमुकुलाः मन्मथगजस्य दन्तरूपतां अभजन् । चम्पककोरकाः दीपतां आसाद्य मधुकरसङ्घरूपस्य तिमिरस्य नाशे कारणमभूवन्निति चार्थः ।

विदलितबहुलमनोरथवैभवपथिकवधूदुरवापे ।
[1]मदनसमेधितकेलिमिलद्युवतिप्रिययोरनुरूपे ॥ ७ ॥

[2]श्रीरामकविरचितं कृतिनामिह कर्णरसायनभूतम् ।
चारुतरं सुचिरं जयतान्मधुवर्णनमभिनवगीतम् ॥ ८ ।

इति तृतीयाष्टपदी ॥

[3]दरदलदरविन्दस्यन्दमानं मरन्दं
मदगज इव मन्दं मन्दमास्यन्दमानः ।
इह समदमिलिन्दव्रातपीतार्धभागं
विकिरति पवमानः स्फीतगन्धात्तमानः ॥ १८ ॥

[4]मल्लीमञ्जुलमञ्जरीमधुझरीमाधुर्यपर्युद्भ्रम-
द्भृङ्गीसङ्गतरङ्गिताङ्गजधनुष्टङ्कारशङ्काकुलैः ।
पान्थैरुन्मदकोकिलस्वरपरिभ्रान्तैर्नितान्तातुरै-
र्नीयन्ते बत साम्प्रतं कथममी वासन्तिका वासराः ॥ १९ ॥

[5]लताङ्गनालिङ्गनमञ्जुलोल्लस-
द्भुजङ्गभोगायतवृत्तदोर्युगम् ।
रघुप्रवीरं विहरन्तमन्तिके
निदर्शयन्ती निजगाद तां सखी ॥ २० ॥

---

1 मदनमुदितरति (ख)
2 'रामकवे रचनं' इति पाठात् वृत्तभङ्गः परिहरणीयः
3 अत्र वियोगिदुस्सहं वासन्तं वायुं वर्णयति । मालिनी च्छन्दः ।
4 अत्र वासन्तिकानां दिनानां दुस्सहत्वं उच्यते । श्लोकद्वयेन वसन्तभावाः वर्णिताः शार्दूलविक्रीडितं छन्दः ।
5 सखी तां सीतां निजगादेत्यर्थः । वंशस्थं छन्दः ।

अष्टपदी—४

रामक्रियारागेण गीयते

चन्दनसारपरीमलबन्धुरपीन[1]भुजो जितवाली।
इन्दुविनिन्दकमुग्धमुखाधरबिम्बदरस्मितशाली ॥ १ ॥

रघुपतिरत्र लतानिवहे सदा विहरति फलभारवहे
[2][ध्रुवपदम]

[3]कामपि कल्पलतां चलदङ्गुलिपल्लवतल्लजशोभाम्।
त्वामिव भामिनि पश्यति सस्मितमङ्गजसङ्गरलोभाम् ॥ २ ॥

कामपि वृत्तघनस्तबकस्तनचूचुकबम्भररामाम्।
त्वामिव भामिनि सम्परिरभ्य सविभ्रममेत्यभिरामाम् ॥ ३ ॥

कामपि पक्वफलाधरमधुरिमविधुरितमधुरसधाराम्।
त्वामिव भामिनि चुम्बति सम्भृतपुलकविकासमुदाराम् ॥ ४ ॥

कामपि पुनरुपकण्ठरणत्कलकण्ठरवामृतपूराम्।
त्वामिव भामिनि तानगणैरनुगायति गानविहाराम् ॥ ५ ॥

कामपि कल्पलतां कलकीरमनोहरवचनविलासाम्।
त्वामिव भामिनि चाटुशतैरनुवदति मधुरदरहासाम् ॥ ६ ॥

---

1 भुजाजितपाली (क.ख)

2 ध्रुवपदस्थाने मातृकायां पल्लवीति दृश्यते। तत्तु कर्णाटकभाषायां ध्रुवपदस्यैव नामान्तरम्।

3 रामस्यैकपत्नीकत्वात् गीतगोविन्दवद्युवतियूथलीलाकारित्वं न वर्णयितुं शकयमतः तत्स्थाने कल्पलतादिष्वेव स्त्रीत्वमारोप्य रघुपतिलीलां वर्णयति।

व्यग्रमना घनसौरभलोभपरिभ्रमदलिकुलनीलाम् ।
जिघ्रति कामपि चुम्बति कामपि श्लिष्यति कामपि मालाम् ॥ ७ ॥

रामकवेरिदमनुपदमधुरमुदारमुदितमधिलोकम् ।
काममपारविलासयुतं विदधातु सदा बुधलोकम् ॥ ८ ॥

॥ इति चतुर्थ्यष्टपदी ॥

[1]हृष्यद्बालरसालमौलिविलसल्लोलप्रवालावली
लीलास्वादनशीलकोकिलकुलप्रोत्फुल्लकोलाहलैः ।
उन्मीलन्मकरन्दसिन्धुविहरद्भृङ्गी[2][सु]सङ्गीतकैः
शृङ्गारीह वनावनीमनुभवन्मुग्धो विभुः क्रीडति ॥ २१ ॥

[3]सरोरुहलसत्करां सरसपक्वबिम्बाधरां
विलोलदलिकुन्तलां विकचकुन्दमन्दस्मिताम् ।
पृथुस्तबकसुस्तनीं पिकशुकस्वरालापिनी-
मिमां प्रियतमां वनीमनुभवत्ययं ते पतिः ॥ २२ ॥

सर्गान्तमङ्गलम्

वैदेहीवदनेन्दुबन्धुरसुधाहृष्यच्चकोरार्भक-
स्त्रैलोक्याद्भुतजीवरत्नमवनीदेवैककल्पद्रुमः ।
पौलस्त्योन्मदहस्तिमस्तकभिदासंरब्धसिंहश्रियं
ध्यायत्तापसचित्तचातकघनः श्रीराघवः पातु नः[4] ॥ २३ ॥

इति श्रीरामचन्द्रचरणराजीवराजहंसायमानमानसघनपुरनिवासि-नरसिंहदेवकुमाररामकविविरचिते सङ्गीतराघवे महाकाव्ये प्रथमस्सर्गः ॥

---

1 रघुपतेः क्रीडोत्कर्षं वर्णयत्येतत्प्रभृति । शार्दूलविक्रीडितं छन्दः ॥
2 मातृकयोरत्र 'त' इत्यक्षरं वर्तते ।
3 पृथ्वी छन्दः
4 शार्दूलविक्रीडितं छन्दः ।

द्वितीयः सर्गः

[1]किसलयकराः प्राञ्चद्बिम्बाधरस्तबकस्तनाः
परिमिलदलिश्रेणीवेणीर्लतावनितास्तदा ।
कलयति गुणग्रामे रामे समुज्ज्वलदङ्गजा
पुनरवनिजा मोहावेशान्निजामवदत्सखीम् ॥ २४ ॥

अष्टपदी—११

तोडीरागेण गीयते ।

अनिमिषयुवतिकदम्बकरच्युतकुसुमसमञ्चितमस्तम् ।
मणिमयवलयविभूषितकाञ्चनचापलताञ्चितहस्तम् ॥ १ ॥

रामं मनसिजकोटिविलासम्
स्मरति मनो मधुसुरुचिरवेषम् ॥ ध्रुवपदम् ॥

जलधरनीलकलेवरचारिमवलयितकेकिसहस्रम् ।
विलसदपाङ्गकरङ्गदपारकृपारसपूरमजस्रम् ॥ २ ॥

[2]सरसपचेलिमबिम्बफलाधरचुम्बनलङ्घितकीरम् ।
स्फुरितमुखेन्दुगलन्मधुरस्मितशुचिरुचिमुदितचकोरम् ॥ ३ ॥

दलदरविन्दविनिन्दकसुन्दरमन्दविलोलदृगन्तम् ।
[3]विलसदधरदलविद्रुममौक्तिकपङ्क्तिविराजितदन्तम् ॥ ४ ॥

---

1 लतास्वासक्तस्य रामस्य विरहेण खिन्ना सीता पुनरपि सखीसमीपे स्वामवस्थां कथयति ॥ हरिणीछन्दः ।

2 पक्वबिम्बफलभ्रान्त्या रामाधरं शुकाः, लङ्घयन्तीत्यर्थः ।

3 विद्रुमवर्णो रक्तच्छायात्मकः ।

हिमरुचिशकलविलासधुरन्धरमृगदसुन्दरफालम्।
श्रमजलशीकरनिकरकरम्बितकुण्डलललितकपोलम् ॥ ५ ॥

मरकतमणिरमणीयभुजान्तरस्फुरदुरुमौक्तिकहारम्।
[1]तरलतरामलसुरसरिदश्रितमिव यमुनाजलपूरम् ॥ ६ ॥

परिहितकनकवसनरशनागुणमणिगणरञ्जितदेहम्।
[2]परिचलदचिररुचिप्रचयाश्रितमिव नवजलदसमूहम् ॥ ७ ॥

रामकविप्रसृता भुवि भारती[3]–[4]विकसितवदनसरोजे।
कोमलललितपदार्पण[5] [खेलात्] नृत्यतु रसिकसमाजे ॥ ८ ॥

॥ इति पञ्चम्यष्टपदी ॥

[6]स्पृहयति न सा हार्दं सार्धं कदापि सखीजनैः
तिरयति निजौन्नत्यं कृत्यं न जात्वपि मुञ्चति।
अयि जयरमाक्रान्ते कान्ते सुमेषुशतोपमे
कुवलयदलश्यामे रामे मनो मम मुह्यति ॥ २५ ॥

---

1 गङ्गायमुनयोस्सङ्गमे जलं मेघच्छायानुकारि। तच्छोभामावहति राघव इति ज्ञेयम्
2 अचिररुचिः विद्युत्। कनकवसनादिभिर्युक्तस्य रामस्य शोभा विद्युद्युक्तजलदानुकारिणीत्यर्थः ॥
3 अत्र मात्राधिक्यं वर्तते।
4 एतावत्पर्यन्तं 'ख' मातृकायां पाठः लभ्यते।
5 मातृकायां 'चेलन' इति पाठः दृश्यते। तेन नात्र कोऽपि स्फुटोऽर्थः प्रतिभाति।
6 हरिणी छन्दः।

अष्टपदी—६

काम्बोधीरागेण गीयते ।

[1]अधिकचलोचनकुवलयया प्रियमिह नवकुवलयकान्तम् ।
व्यवहितविशदतदीयदरस्मितचन्द्रिकया निजकान्तम् ॥ १ ॥

दयिते दशरथराजकुमारम् ।
सविनयमानय कुञ्जगृहे विरहाकुलया सह रन्तुम् ॥ [2]ध्रुवपदम् ॥

मदनमतङ्गजकुम्भविजृम्भिपयोधरयाऽचलधीरम् ।
मृदुतरतरलभुजालतया वितरणगुणजितमन्दारम् ॥ २ ॥

मधुकरनिकरशिरोरुहमुग्धमुखाम्बुजया[3][त्वमिनं तम्] ।
अधरितमधुरसमधुरिमबिम्बकलाधरया वरदं तम ॥ ३ ॥

महितसुवर्णसवर्णकलेवरया [4]वलभिन्मणिनीलम् ।
विहितमनोभववैभवया कुसुमायुधकेलिविलोलम् ॥ ४ ॥

स्वरजितकोकिलकलरवया मनोरथसहकारवसन्तम ।
स्मरसमरोद्यमलालसया दरहाससुधां विकिरन्तम् ॥ ५ ॥

सुललितमृदुकरपल्लवया हृतपीतवसनमनुरक्तम् ।
विलसदपाङ्गपतङ्गसुधाझरवीचि[क]या परिषिक्तम् ॥ ६ ॥

करधृतकङ्कण[5]भर्ममयोर्मिकया परिकर्मविनिद्रम ।
स्फुरितविभासरितापरितोदितागण्यलावण्यसमुद्रम् (?) ॥ ७ ॥

---

1 अधिकच....कुवलयया सह रन्तुमित्यन्वयः । उत्तरत्राप्य स्यामष्टपद्यां तथैवान्वयः ।

2 अत्र मातृकायां "पल्ल" इति वर्तते ।

3 तमिनत्वम् [क]

4 वलभिन्मणिरिन्द्रनीलमणिस्तद्वन्नीलमित्यर्थः ।

5 भर्म सुवर्णम्

रामकवेरिदमतिरसबन्धुरमधुरपदं मृदुपाकम्।
कामशरार्दितभूमिसुतावचनं जयतादधिलोकम् ॥ ८॥

इति षष्ठ्यष्टपदी

सीतामपश्यतो रामस्य विरहव्यथावर्णनम्

[1]विहाय पुष्पापचयादिविभ्रमं
विचित्य सीतां विपिने समन्ततः।
निधाय[2][चिन्तां मनसि प्रथीयसी]-
मुवास रामः सरयूसरित्तटे ॥ २६॥

[3]सीतां शीतमयूखबिम्बवदनामम्भोजपत्रेक्षणा-
माताम्राधरपल्लवां प्रतिमुहुःप्रस्यन्दिमन्दस्मिताम्।
आपीनस्तनकुम्भभारभरणत्रस्यद्वलग्नां परं
लग्नां चेतसि चिन्तयन् रघुपतिः कामात्ततापातुरः ॥ २७॥

---

1 वंशस्थं छन्दः।
2 चिन्तामवसि प्रदीयसी (क)
3 उवासेति पूर्वेणान्वयः। वलग्नः कटिप्रदेशः। शार्दूलविक्रीडितं छन्दः।

अष्टपदी-७

भूपालीरागेण गीयते।

मामनागसमेव नूनमजानती बत जानकी ।
प्रेमभावमपास्य यास्यति सा रुषा निमिषन्मुखी ॥ १ ॥

वृथाखलु मया स्थीयते दयितां विना ।
[[1]ध्रुवपदम्]

सा कदा पुनरिन्दुसुन्दरमाननं जनकात्मजा ।
श्रीकरं मम दर्शयिष्यति सस्मितं विलसत्कचा ॥ २ ॥

किं फलं फलपुष्पभारलसद्रसालवनेन ।
किं फलं मलयाचलादिह सञ्चलत्पवनेन ॥ ३ ॥

[2]सा सुधामधुराधरा [3]विरहज्वरातपजन्याम् ।
वासरेऽत्र कदा हरिष्यति सप्रमोदमुदन्याम् ॥ ४ ॥

तादृशीमपहाय हा कुचकुम्भचर्चितरोचनाम् ।
मादृशेन पुनः कथं भवितव्यमायतलोचनाम् ॥ ५ ॥

कोकदम्पतिवर्तुलस्तनभारभीरुवलग्नाम् ।
आकलय्य मनोरमां रमयामि तां हृदि लग्नाम् ॥ ६ ॥

हा प्रिये तव विप्रियं न मया कृतं कलवाणि ।
मे प्रसीद महीसुते मुहुरञ्जलिं करवाणि ॥ ७ ॥

---

1 पल्ल [क]

2 विरहातपजन्यां मदनसन्तापजन्यां तां उदन्यां तृष्णां इत्यर्थ

3 विरहज्वरं तपजन्याम् (क)

रामसूरिसमीरितं रसवैभवेन सुधायितम् ।
कोमलं परिशीलयन्तु कुशीलवा विबुधादृतम् ॥ ८ ॥

॥ इति सप्तम्यष्टपदी ॥

[1]हन्तायं तपनो नितान्तमिह मां सन्तापयत्यातपैः
सौमित्रे कलयातपत्रमचिराद्गात्राणि सीदन्ति मे ।
नाथासौ किल शीतदीधितिरियं, राकानिशाकौमुदी
वैदेहाविरहातुरस्य भवतश्चण्डाशुरूपायते ॥ २८ ॥

[2]को वा सम्प्रति मां प्रति प्रकिरति प्रच्छन्न एवाशुगान्
सौमित्रे धनुरानयाशु निशितान् बाणांश्च तूणीरतः ।
[3][देवासावसुरेन्द्रजो न न खरो] नो दारुणो रावणः
सोऽयं को[4]ऽप्यतनुः कथं कथय ते बाणस्य लक्ष्यं भवेत् ॥ २९ ॥

[5]समुन्मीलन्मल्लीपरिमलपरीवाहविभवैः
समीरः पाटीराचलनिलय एष व्यथयति ।
असौ कुर्वन्मौर्वीनिनदमनिदानं मनसिजः
ससौरभ्यं किं मामिह शरकदम्बैः प्रहरति ॥ ३० ॥

[6]तीव्रान् पार्विकशर्वरीकर करान् मा मुञ्च तावद्रुषा
तावत्त्वं च न सञ्चरानलसख श्रीखण्डशैलादितः ।
रे कन्दर्प न तावदर्पयशरानङ्गेष्वपाङ्गामृतैः
सीता शीतलयत्युपेत्य सहसा यावन्मम प्रेयसी ॥ ३१ ॥

---

1 राघवविरहावस्थां वर्णयति । शार्दूलविक्रीडितं छन्दः ।

2 मदनशरार्दितो राघवः आत्मानं कोऽपि राक्षस एव प्रच्छन्नः प्रहरतीति भ्रान्त्या लक्ष्मणमाह । शार्दूलविक्रीडितं छन्दः ।

3 'देवासावसुरेन्द्रजं न च खरो' इति मातृकापाठेऽर्थः न सङ्गच्छते ।

4 कोह्यतनुरिति मातृकापाठः

5 पाटीराचलनिलयः मलयाद्रिस्थ इति ज्ञेयम् । अत्र ससौरम्भमिति मातृकायां दृश्यमाने पाठे अर्थः न स्फुटो भवति । मनसिजबाणानां सौरभ्यसहितत्वे दक्षिणानिलो हेतुः । शिखरिणी छन्दः ।

6 पूर्णिमाचन्द्रं, मलयानिलं मदनं च वारयति सीतागमनपर्यन्तम् ।

[1]मन्दं मन्दं मधूलिं मलयगिरिचरो माधवीनां नवीनां
हारं हारं विहारैर्वर्व्यथयति पथिकानत्र धीरस्समीरः ।
मारोऽप्यारोप्य मौर्वीमलिकलभमयीमात्तचापो सकोपं
धावं धावं विदरान् विधुरयति शरैरर्दयन्निर्दयात्मा ॥ ३२ ॥

[2]कालिन्दीमिव कालभोगिविलसद्वेणीभरोद्भासिनीं
कावेरीमिव चारुविष्णुपदवद्रोचिष्णुमध्यस्थलीम् ।
स्वर्गङ्गामिव भूरिहंसकसमाक्रान्तोर्मिकालङ्कृतां
तां लावण्यतरङ्गिणीं कलयतस्तापः क्व मे वर्तते ॥ ३३ ॥

[3]या ताम्राधरपल्लवा सुवदना या चन्द्रभागालिका
या वक्षोरुहकल्पिताङ्गभवराड्डुत्तुङ्गभद्रासना ।
या शोणाम्बुजविभ्रमप्रदकरा या कृष्णवेणीभरा
सैषा मे कलभाषिणी धरणिजा नासीत्कुतो नर्मदा ॥ ३४ ॥

प्रेमी मैथिलभाषितेषु नितरां भूमीसुतायां ततः
कामीभूय [4]महद्धनुर्व्य[दलय]द्यो मीनकेतुद्विषः[5] ।
श्यामीभूतकलेवरः स भजतां सामीप्यकल्पद्रुमः
स्वामी रक्षतु नः सदा [6]करकनचामीकरेष्वासनः ॥ ३५ ॥

---

1 मधूलिरिति आम्रवृक्षस्य नामोद्दिष्टम् । प्रकरणबलादत्राम्रपुष्परेणुर्भवेत् । विदाराः देशान्तरगतदारा इति ज्ञेयम् ।

2 यमुनानदीपक्षे कृष्णावतारे कालियस्य तज्जलान्तर्गतत्वं तेन च वेणीरूपत्वं तस्यावगन्तव्यम् । विष्णुपदवदाकाशावदति लक्षणसूक्ष्मकटिप्रदेशामित्यर्थः । भूरिहंसकेत्यादि । सीतापक्षे हंसको नूपुरः, ऊर्मिका अङ्गुलीयकमिति च ज्ञेयम् ।

3 अत्र चन्द्रभागात्वतुङ्गभद्रात्वशोणात्वकृष्णवेणीत्वादिकं सीतायामारोप्य सा कुतो मे नर्मदा नाभवदिति विरोधः । सीतापक्षे नर्मदा आनन्ददायिनीत्यर्थः । चन्द्रभागालिकात्वं द्वितीयाचन्द्रदिवद्रेखाकृतिकुङ्कुमवत्त्वम् ॥

4 महद्धनुर्व्यदयद्यो (क)

5 शिवस्य धनुरित्यर्थः ।

6 करलसत्सौवर्णधनुष्क इति ।

इति श्रीरामचन्द्रचरणराजीवराजहंसायमानमानसघनपुरनिवासि [1]नरसिहंदेवकुमाररामकविविरचिते सङ्गीतराघवे द्वितीयः सर्गः ॥

1 नरसुम्हदेवकुमार (क)

तृतीयः सर्गः

सरयूतीरमन्दारभूरुहान्तरशायिनम् ।
बभाण कामबाणार्तं राघवं जानकीसखी ॥ ३६ ॥

अष्टपदी—८

सौराष्ट्ररागेण गीयते ।

सा दयिता भवता रहिता नितरामसमाशुगखिन्ना ।
माधविकालतिकेव विकीर्णा सीदति सम्प्रति खिन्ना ॥ १ ॥
सा दयिता त्वदधीना । राम सा दयिता त्वदधीना ॥
राघव तव परिरम्भणसम्भ्रमविरहवशादिह दीना ॥ [1][ध्रुवपदम्]

[2]सुन्दरमतिरसबन्धुरमिन्दिरामन्दिरमप्यरविन्दम् ।
निन्दति चम्पकोशमिवाशु मिलिन्दसखीव सुगन्धम् ॥ २ ॥

दशरथे करुणारसपूरसुधाशरधे! त्वयि मग्ना ।
सा शफरीव कृपारहिताङ्गजपाशकरे बत लग्ना ॥ ३ ॥

वनहुतवहमिव[3][विशति सुशीतलमञ्जुलकुञ्जकुटीरम्] ।
गणयति फणिपरिरम्भणसम्भृतगरमिव सरसपटीरम् ॥ ४ ॥

[4]ज्वलति भवद्विरहज्वलने हृदि मौक्तिकमणिमयहारम् ।
कलयति पृथुकुचकोरकपरिमिलादलिनामिव हारम् ॥ ५ ॥

मरकतमणिमयमञ्चविकल्पे नवनलिनीदलतल्पे ।
स्मरविजिता चपला चपलेव [5][च]विलुठति जलधरकल्पे ॥ ६ ॥

---

1 पल्ल इति मातृकायाम् ।

2 अत्रेन्दिरामन्दिरमिति मात्राधिकयं दृश्यते। चम्पककोश समीपे भ्रमरा न गच्छन्तीति तात्पर्यम् ।

3 दिशति सुशीकलमञ्जुलकुञ्जकुलीरम् इति मातृकापाठः।

4 विरहज्वरज्वलनपतिताः मुक्तामणयोऽपि श्यामा भवन्तीत्यर्थः॥

5 स विलुठतिइतिमातृकापाठः।

तोयजनयन परं विरहार्दित सा तव [1]लपनमतन्द्रम्
ध्यायति हृदि [2]तपनोग्रावित्रसचकोरवधूरिव चन्द्रम् ॥७॥

रामकवेरिदमुदितमुदारं [3]मृदुमधुरार्थसमेतम् ।
प्रेमयुतं विदधातु सुधाललितं बुधजातम् ॥८॥

॥ इति अष्टम्यष्टपदी ॥

व्यालीभिः परिवेष्टितेव नितरामालीभिराबिभ्यती
मालामुत्पलकल्पितामपि शिखिज्वालावलीं जानती ।
लीलातामरसं करे कलयती हालाहलाशङ्कया
सालं मारशरार्दिताङ्ग[4]लतिका लोलाधिकं म्लायति ॥३७॥[5]

---

1 लपनं मुखमित्यर्थः ।

2 तपनाशवत्रस इति मातृकापाठे नार्थः कश्चन भाति ।

3 'मृदुतरमभिनवगीतम्' इति मातृकायां द्वितीयः पाठः ।

4 ललिता लालाधिकं म्लायती इति मातृकापाठः । शार्दूलविक्रीडितं छन्दः ।

अष्टपदी ९

देशाक्षीरागेण गीयते ।

चकचकदूरुपराजितरम्भा
न चलति पदमपि पृथुलनितम्बा ॥ १ ॥

जानकी राम जानकी
जानकी भवता रहितानघ
राघव रघुकुलकमलदिनेश ॥ ध्रुवपदम् ॥

शीतलमपि मलयाद्रिसमीरम् ।
सा तरुणी गणयति[1] विषपूरम् ॥ २ ॥

मृदुतरमपि नवकुवलयहारम् ।
हृदयविशिखमिव किरति सुदूरम् ॥ ३ ॥

[2]ज्वलनशकलमिव चन्दनबिन्दुम् ।
कलयति रविमिव पार्बिकमिन्दुम् ॥ ४ ॥

स्मरति सदैव [3]त[वा]ननचन्द्रम् ।
दरतिमिरौघनिरासवितन्द्रम् ॥ ५ ॥

[4]तव चरितानि सुधामधुराणि
कथयति सा पुनरिह [5]शुकवाणी ॥ ६ ॥

---

1 विषप्रवाहमिवेति ज्ञेयम् ।

2 मदनदाहार्दितानामङ्गानामुपशान्त्यर्थं अङ्गेषु दत्तं चन्दनबिन्दुमपि शीतलं, सा अग्निकणमिव गणयतीत्यर्थः ।

3 तहननचन्द्रम् इति मातृकापाठः

4 तदचेरितानि इति मातृकापाठः

5 शुकालापवन्मधुरभाषिणीत्यर्थः ।

स्वपिति न जात्वपि ससुखमजस्रं
जपति परं तव नामसहस्रम ॥ ७ ॥

रामकवेरिदमभिनवगीतम् ।
प्रेमयुतं कलयतु कविजातम् ॥ ८ ॥

जानकी राम जानकी ।
[[1]जानकी भवता रहितानघ
राघव रघुकुलकमलदिनेश] ॥

इति नवम्यष्टपदी

[2]सत्रासं वलमानमीननयना सम्फुल्लवक्त्राम्बुजा
चक्रद्वंद्वसमुन्नतस्तनभरा शैवालनीलालका ।
सा लावण्यतरङ्गिणी घनदयापाथोनिधे साम्प्रतं
नाथ त्वद्विरहा[3]नलाकुलतया सीता परं शुष्यति ॥ ३८ ॥

[4]अद्य[त्वद्विरहज्वरावृत]तनोरस्याश्चिरं चञ्चलं
[5]चेतश्चूत[लताशतावृत]महो लीलागृहं नेहते ।
[मालं]पञ्चशराशुगैरिति कृतं हित्वा हृदि त्वामियं
ध्यायन्ती क्षणमन्तरा न सहते लोलेक्षणा जीवितुम् ॥ ३९ ॥

कथमपि सखि तामनङ्गभीता
मिह मम सन्निधिमा[6]नयाशु सीताम् ।
रघुकुलतिलकेन बोधितैवं
पुनरिदमाह समेत्य भूमिजाताम्[7] ॥ ४० ॥

---

1 एतदावरणान्तर्गतं ध्रुवपदमत्र योज्यम् ।
2 नदीपक्षे चक्रवाकयुक्तेति ज्ञेयम् । शार्दूलविक्रीडितं छन्दः ।
3 तवाकुलतया ।
4 त्वद्विरदञ्जरावृत, ... ञ्चला
चेतः शूतलशतावृत . . . . ।
माचं . . . . .
ध्यायन्ति . . . . ॥ इति मातृकापाठे अर्थः स्फुटो नास्ति ॥
5 चूतलतानां सत्त्वं कविसमयानुरोधेन । शार्दूलविक्रीडितं छन्दः
6 नयाजु इति मातृकापाठः ।
7 पुष्पिताग्रा छन्दः ।

अष्टपदी १०

भैरवीरागेण गीयते ।

उदयति सितरुचिबिम्बे मदवति ! भीतिमवैति ।
निनदति मधुपकदम्बे निरुपमतापमुपैति ॥ १ ॥

तव विरहे[1]हतवालिः दयिते ! ताम्यति सीते ।। ध्रुवपदम् ॥

विसरति मलयजपवने विसृजति[2] जीवितभारम् ।
विकसति तव निध्याने विन्दति विरहमुदारम् ॥ २ ॥

निवसति निशि निशि गहने निन्दति बहु निजगेहम् ।
विदलति कुसुमविताने विलपति किमपि समोहम् ॥ ३ ॥

मुञ्चति विशिखमनङ्गे मुह्यति भवति ! नितान्तम् ।
चञ्चति पञ्चमवृन्दे किलिकिञ्चितमेति दुरन्तम् ॥ ४ ॥

रचयति रामकवीन्द्रे रघुवरचरितसुपूतम्
सुखयतु सत्कविजातं सरसमिदं मृदुगीतम् ॥ ५ ॥[3]

इति दशम्यष्टपदी ।

[5]यस्मिन्विस्मृतभेदभावमुखयोरासीद्विलासः पुरा
तस्मिन्नेव निकुञ्जमञ्जुलकुटीकोणान्तरे राघवः ।
स्मारं स्मारमदभ्रविभ्रममसौ सुभ्रु त्वयोत्पादितं
भूयस्त्वद्वनेन्दुरञ्जदधरस्फारामृतं वाञ्छति ॥ ४१ ॥

---

1 हतवावि दैते ताम्यति सिते ॥ इति मातृकापाठः ।

2 जोविताभारम् इति मातृकापाठः ।

3 गीतगोविन्दे दशमे प्रबन्धे षडेव पद्यः सन्ति । अत्र तु पञ्च । कारणं चिन्त्यम् ।

4 निकुञ्ज एव मञ्जुला, मनोहरा कुटी तस्याः कोणान्तर इत्यर्थः । अदभ्र; समृद्धः स्फारमनल्पमिति च ज्ञेयम् । शार्दूलविक्रीडितं छन्दः ।

अष्टपदी—११

केदारगौळरागेण गीयते ।

सति कलकण्ठे सरिदुपकण्ठे कूजति पञ्चमरागम् ।
श्रुतिपथशीतं कलयति गीतं तव कलकण्ठि सरागम् ॥ १ ॥

सरसपटीरे सरयूतीरे विहरति वरगुणशाली ।
[1]विजयरमापरिरम्भणसम्भ्रमपुलकितभुजजितवाली ॥
॥ ध्रुवपदम् ॥

सरसिजरङ्गे नृत्यति भृङ्गे ध्वनिततरङ्गमृदङ्गम ।
स्मरति रहस्यं सखि तव लास्यं सपदि तरङ्गदनङ्गम् ॥ २ ॥

मृगमदपङ्कं रचय कलङ्कं वदनसुधाकरबिम्बे
रघुकुलतिलकं रमय सपुलकं मधुमधुराधरबिम्बे ॥ ३ ॥

कुसुमकलापं वलरिपुचापं[2]कुरु धन इव कचजाले।
शिशिरय कान्तं मनसिजतान्तं[3] श्रमजलवलितकपोले ॥ ४ ॥

मधुरबिहारे तव कुचभारे मेलय मणिमय[4][चो]लम् ।
[5]पृथुलनितम्बे जितकरिकुम्भे[6] शीलय दिव्यदुकूलम ॥ ५ ॥

विशदमुदारं नवमणिहारं भूषय पृथुकुचभारे।
दशरथतनयं वरय सविनयं मम वचनादिह धीरे ॥ ६ ॥

---

1 रामस्यैकपत्नीकत्वादियं विजयलक्ष्मीः कल्पिता स्त्री इति ज्ञेयम । युद्धे रामं विजयलक्ष्मीर्वरयामासेति तदुन्मत्तो रामः वनान्तरे कुञ्जान्तरे च सीतां विस्मरन्निव कालं यापयति ।

2 कुरु धनयिव कचजाली। इति मातृकापाठः

3 श्रमजलवल्लित इति मातृकापाठः

4 जोलम् । इति मातृकापाठः

5 पृथुनिनितम्बे इति मातृकापाठः।

6 शीलय परिधेहीत्यर्थः।

अयि रजनीयं व्रजति मदीयं पालय वचनमिदानीम् ।
प्रियमनुरञ्जय देवि चिरं जय स्मरसि सुखेन तदानीम् ॥ ७ ॥

[1]रघुपतिदासे रामकवीशे देवनृपालसमाजे ।
निगदति रुचिरं प्रणमत सुचिरं राघवचरणसरोजे ॥ ८ ॥

। इति एकादश्यष्टपदी ।

[2]स्मारं स्मारं स्मरपरवशः स्मेरवक्त्रारविन्दां
भ्रान्तिभ्राम्यद्भ्रमरनिकरभ्राजमानालकां त्वाम् ।
क्लान्तः क्लान्तः कथमपि पुनः कान्तमभ्येत्य कुञ्जं
भूयो भूयो भणति करुणं भूसुते मैथिलीति ॥ ४२ ॥

कान्तस्त्वां तनुमध्यमे तत इतः कामं विचिन्वन्वने
[3]श्रान्तः [4]कन्तुशिलीमुखैश्च दलितः शेते लतासद्मनि ।
तत्प्राणानयमेव देवि समयः पातुं तदीयाधर-
स्वादुस्वादुसुधारसश्च स पुनः किञ्चित्त्वयार्वर्यताम् ॥ ४३ ॥

[5]अथालसाङ्गं समुपेत्य सीता
लतागृहान्ताद्रघुनन्दनाय ।
तदीयवृत्तं विरहप्रवृत्तं
सखी शुकी वागिदमित्युवाच ॥ ४४ ॥

---

1 अत्र देवराजभूपालोऽस्याश्रयदाता कविना स्मर्यते ।
2 अनेन सीतायां राघवस्य प्रेमातिशयः व्यज्यते । मन्दाक्रान्ता छन्दः ।
3 श्रातः इति मातृकापाठः ।
4 कन्तुः स्मरः, तस्य बाणा इत्यर्थः । शार्दूलविक्रीडितं छन्दः ।
5 अथालसाङ्गं तुमवेत्य .. लता गृहीतां इति मातृकापाठेऽर्थः स्फुटो न भवति ।

अष्टपदी—१२

॥ शङ्कराभरणरागेण गीयते ॥

भवदधरामृतपानविहीना
[1]-[2]दवथुवृता नितरामिह दीना ॥ १ ॥

दाशरथे करुणाशरधे सीदति सीता कुञ्जगृहे ॥ ध्रुवपदम्

श्रमजलशीकरनिकरकपोला .
नमयति मुखकमलं गतखेला ॥ २ ॥

मिलितरजोभरपङ्किल[3]गात्रा
विलुठति सा भुवि पङ्कजनेत्रा ॥ ३ ॥

नवकुवलयमयदामसमूहम् ।
[4]भवदावधिया [सा] स्पृशति[5]समोहम् ॥ ४ ॥

श्वसति विषीदति विलपति करुणम् ।
भृशमिह निन्दति कोकिल[6]करुतम् ॥ ५ ॥

श्वसित समुज्वलदधरकिसलया ।
प्रसभवियोग[7]भराहितविलया ॥ ६ ॥

सामिनिमीलितनयनकुवलया ।
त्वामिह हृदि कलयति रतिकलया ॥ ७ ॥

रामकवेरिदमुदितमुदारम् ।
प्रेमयुतं कलयतु[8] कविवारम् ॥ ८ ॥

इति द्वादश्यष्टपदी

---

1 दवथुः परितापः तेन व्याप्तेत्यर्थः ।
2 दवथः इति मातृकायाम् । 3 गात्रम् इति मातृकापाठः ।
4 भवदवधिया । इति मातृकापाठः । 5 समूहम् इति मातृकापाठः ।
6 करुणम् इति मातृकापाठः । 7 भरोहित इति मातृकापाठः ।
8 कविवारं, कविसमूहमित्यर्थः ।

[1]वैदेही भवदागमोत्सुकतया सम्पत्स्यमानोत्सवा
लीलागारमुदाररत्नसुमनोहारैरलङ्कुर्वती ।
अङ्गान्यङ्गजसङ्गरोचितधृताकल्पान्यनल्पाश्रया
कृत्वा सत्वरमद्य सम्प्रति मुहुस्त्वां नाथमुद्वीक्षते ॥ ४५ ॥

[2]भवति कृतविलम्बे शम्बरारातिभीता
कृतविविधविलापा क्वापि[3] कुञ्जे निषण्णा ।
चिरमपि हृदि कान्तं चिन्तयन्ती भवन्तं
रसपयसि पयोधौ राम मीनेव लीना ॥ ४६ ॥

सर्गान्तमङ्गलम्

[4]कृतार्थिततपोवनः कृतसमस्तलोकावनः
कृपाविलसिताननः कृपणवृन्दसञ्जीवनः ।
कराश्रितशरासनः कपिचमूसमुल्लासनः
करोतु कुशलानि नः खरविराधविध्वंसनः ॥ ४७ ॥

इति श्रीरामचन्द्रचरणराजीवराजहंसायमानमानसघनपुरनिवासि नरसिंहदेवकुमाररामकविविरचिते सङ्गीतराघवे तृतीयः सर्गः ॥

---

1 वासकसज्जनायिकात्वं वर्ण्यते। शार्दूलविक्रिडितं छन्दः

2 मालिनी छन्दः ।

3 कुम्भे इति मातृकपाठः ।

4 कृपणवृन्दं दीनसमूहः तस्य जीवनहेतुरित्यर्थः ।

चतुर्थः सर्गः

[1]अथ निजकरजालैरञ्जसा दिग्वधूना-
ममलतरदुकूलं कल्पयन्नादरेण ।
कुसुमशरविराजः कोऽप्यसौ कीर्तिराशिः
प्रथमगिरिविटङ्कात्प्रादुरासीन्मृगाङ्कः ॥ ४८ ॥

[2]विलसति शिशिरमयूखे
रतिसुखविमुखे च राघवे दीना ।
सपदि समुत्थितशोका
लोकसतीवाथ सा ततापोच्चैः ॥ ४९ ॥

अष्टपदी—१३

अहरिरागेण गीयते ।

सततकरतलविलाससरसीरुहम् ।
व्यथयति तदेतदिह मामतिभयावहम् ।
किं नु मे भवति शरणम्
मयि सदय ते प्रियेयम् ॥ ध्रुवपदम् ॥ १ ॥

[3]शशिकिरणोऽयमिह चण्डकिरणायते
कुसुमविशिखोऽपि कुपितो मयि यमायते ॥ २ ॥

---

1 सीताविरहव्यथाधिवयकारणभूतं चन्द्रोदयं वर्णयत्यत्र । मालिनी छन्दः ।

2 अत्र चन्द्रोदयसम्भूतं सीताविरहव्यथाबाहुल्यं वर्णयति । लोकसतीवेति सामान्य-
स्यभिधायकं स्यात । आर्या छन्दः ।

3 शशिकिरणोऽयमित्यत्र सम्भाव्यमानं मात्रालाघवं शीतकिरणोऽयमिति पाठान्तरेण
निवारयितुं शक्यते ।

चन्दनगिरीन्द्रचर[1] धीर परमालसम् ।
किं[2]दहसि [3]वाचाल पवमान मम मानसम् ॥ ३ ॥

अहह घनसारपरिमिलितनवचन्दनम् ।
वहति हृदि दयितविरहाकलितनिन्दनम् ॥ ४ ॥

प्रति मुहुरिहैव किल कोकिलविलासिनी
बत किमुपकूजति कुहूरिति विहासिनी ॥ ५ ॥

वनभुवि हतास्मि बत वितथनवयौवना
क्षणमपि न जातु जीवामि दयितं विना ॥ ६ ॥

कथमपि वृथैव निवसामि रमणोचिता
व्रतमुपविशामि भुवि मनसिजविराजिता ॥ ७ ॥

रामकविसूक्तिनवमौक्तिकपरम्परा
काममभिरञ्जयतु [4]राघवतनुं परा ॥ ८ ॥

इति त्रयोदश्यष्टपदी

[5]चिरयति बत नाथश्चाटुगोष्ठ्या कया वा
सविधमिह सखी वा सत्वरं नागता मे ।
स्मरहतकनियोगादेष दोषकरो मां
दहति निजकरैर्हा किं करोमि क्व यामि ॥ ५० ॥

1 दीर इति मातृकापाठः 2 बहसि इति मातृकापाठः 3 चाचाल, इति मातृकापाठः 4 राघवतवं इति मातृकापाठः

5 विप्रलब्धा सीतात्र राघवागमनविलम्बे शङ्कामुद्भावयन्ती चन्द्रातपतापस्यासह्यतां प्रदर्शयति । मालिनी छन्दः ।

[1]प्रासूनाशुग एव शम्भुनयनज्वालावलीढः पुरा
कासारेऽत्र सुधाकरे निपतितस्तापापनोदेच्छया।
योऽसौ सामिविदग्धमेचकवपुस्तस्मिन्कलङ्कच्छला
दासीनः करशीकरान्विकिरति स्वैरं सुतीक्ष्णान्मयि ॥५१॥

[2]कान्तः किं मृगयार्थमुद्यतधनुर्मध्येवनं वर्तते
किं [3][वा मत्प्रति]मार्गणार्थमगमल्लङ्कामलङ्कातरः।
तत्किं वापचिनोति मे वनभुवि स्वैरं प्रसूनान्यहो
यद्वायं विजयेन्दिरामनुभवन्नद्यापि मां नेहते ॥५२॥

[4]सारामोघापाङ्गधाराविहारैः
स्फारामोदप्रापकस्त्वाश्रितानाम्।
आरामो यस्सर्वदा सद्गुणानां
श्रीरामोऽस्तु श्रेयसे भूयसे नः ॥५३॥

[5]अथागतां राघवमन्तरेण
वृथाकृतोद्योगविषादखिन्नाम्।
[6]सखीमथापृच्छय रघुप्रवीरे
विशङ्कमाना [7]मनसैतदाह ॥५४॥

---

1 प्रासूनाशुगः पुष्पबाणः कामः। सामि अर्धम्। अत्र चन्द्रकलङ्कं अर्धदग्धमन्मथशरीरमेवेति उत्प्रेक्षमणा सीता चन्द्रकिरणानपि कामबाणत्वेन विभावयन्ती तेषः सुतीक्ष्णत्वं प्रदर्शयति। शार्दूलविक्रीडितं छन्दः।

2 राघवस्यानागमने नानाविधाशङ्कां करोति सीतास्मिन् पद्ये। शार्दूलविक्रीडितं छन्द

3 वामत्यति इति मातृकापाठः।

4 इयं कव्युक्तिरिव दृश्यते। परन्तु सर्गादिं अन्तं वा विना मध्य एव अस्याशीरूप। मङ्गलस्य हेतुरुहनीयः॥ शालिनी छन्दः।

5 दूतीकर्मणि वैयर्थ्यं दृष्ट्वा खिन्नाभवदित्यर्थः। उपेन्द्रवज्रा छन्दः।

6 सखीमियविष्टया इति मातृकापाठः। 7 मनरेतदाह इति मातृकापाठः।

अष्टपदी — १४

कापिरागेण गीयते

[1]धनुरनुरञ्जितभुजबलनीता
मनुकुलकेसरिणा परिणीता ॥ १ ॥
कापि दयिततमा मम पतिमिह रमयति विजयरमा
॥ ध्रुवपदम् ॥

पृथुकरिकुम्भलसत्कुचकुम्भा
रथपदवर्तुलविपुलनितम्बा ॥ २ ॥

[2]श्वेतातपत्राननशशिबिम्बा
ख्यातप्रतापधुराधरबिम्बा ॥ ३ ॥

विविधवरायुधगणनख[3]भूषा
प्रवरितचामरसुरुचिरकेशा ॥ ४ ॥

कलितयशःफलविमलदुकूला
[4]जलजदलाक्षमगादनुकूला ॥ ५ ॥

भुजपरिरम्भणसम्भ्रमसुखिता
भजतिं पतिं मम सम्प्रति महिता ॥ ६ ॥

पुञ्जितशरगणनयनविकासा
टङ्कृतिमसृणितमणितविलासा ॥ ७ ॥

---

1 अस्यामष्टपद्यां जयलक्ष्मीः वर्ण्यते। मनुकुलकेसरी राघवः।
2 श्वेतेत्यत्र मात्राधिक्यं दृश्यते।
3 जलजदलाक्षोऽत्र राघवः।
4 तोषा इति मातृकापाठः।

रामकवेरतिवेलरसार्द्रं
काममिदं कलयतु कविहार्दम् ॥ ८ ॥

इति चतुर्दश्यष्टपदी

[1]वक्तव्यं किमितः परं सखि मया लोकत्रये मादृशी
नास्तीति प्रतिपन्नरूपविभवाहङ्कारमेवावसम् ।
मत्तोऽप्युत्तमरूपयौवनगुणोन्मिश्रा जयश्रीरियं
चित्तं नर्तयतीह तस्य कमितुस्तैस्तैर्विलासैर्निजैः ॥ ५५ ॥

[2]वदने मधुरस्मितं प्रसन्नं
विलसद्दिव्यशरासनं कराब्जे ।
हृदये सदयारसं सुवेषं
पुरतः किञ्चन धाम मे चकास्तु ॥ ५६ ॥

---

1 राघवानागमनदुःखिता आत्मानं निन्दति सीतात्र। तथा च जयश्रिया दृढमाकृष्टः पतिरिति च निश्चिनोति। शार्दूलविक्रीडितं छन्दः

2 परनायिकाक्रान्तं पतिं शोचन्ती तस्यात्मनः पुरः स्थितिमीहते सीतात्र। अथवा ग्रन्थकृदुक्तिरपि भवेदिदं पद्यम् ।

अष्टपदी—१५

मुखारिरागेण गीयते

[1]विजयवधूटीमिह भुजपीठीस्थलमधिरोप्य चिरम् ।
निजरणकोटीं रतिपरिपाटीमुपविशति प्रचुरम् ॥ १ ॥
रमते जयरमया समरे पतिरिह मामपहाय ॥ ध्रुवपदम् ॥

भ्रमरपरीते मधुरसशीते कुसुमिततरुशिखरे ।
कमपि सरागं पञ्चमरागं कूजति पिकनिकरे ॥ २ ॥

काञ्चनधनुषा खलु तद्वपुषा विलसति भुवि सततम् ।
किञ्च निषङ्गद्वयमथ जङ्घे वहति भुजेऽप्युचितम् ॥ ३ ॥

तिमिरनिरासं दिशि दिशि भासं विकिरति शशिनिकरे ।
समदमवेलं मयि शरजालं मुञ्चति पञ्चशरे ॥ ४ ॥

कलयति वेणीमिव स कृपाणीं करकमलिनमपरम् ।
विलसदपाङ्गानिव शरसङ्घान् बहु मनुते सादरम् ॥ ५ ॥

परिमिलदाशं चम्पककोशं दलयति मलयानिले ।
परदुरवापं मम परितापं कलयति मदनानले ॥ ६ ॥

समनरुमायामविसरमायामभिहितवाचि परम् ?
विजयरमायां विहरति मायां कलयति मयि[2] [ना]दरम् ॥ ७ ॥

पेरिपुररामे संभृतकामे भणति सुधामधुरम् ।
परमतिसदयं बुधजनहृदयं वहतु विलासधुरम् ॥ ८ ॥

॥ इति पञ्चदश्यष्टपदी ॥

---

1 विजयलक्ष्म्या सह रामस्य रतिमाकलयन्ती सीता प्राह । वधूटी युवतिः ।
2 सा इति मातृकापाठः ।

[1]नाथः किं सखि साकमाकलयति क्रीडां तया सादरं
सा किं रूपगुणादिभिर्मदधिका जाता जयश्रीरियम्।
यद्यप्यत्र गुणोत्तरा भवतु किं तस्या गुणोन्मेषणैः
किन्तु स्वान्तगतं समाकलयतीं मां नेहते निर्दयः ॥ ५७ ॥

अष्टपदी—१६

मध्यमावतीरागेण गीयते

[2]मदकलकलभकराभभुजेन
चलति न सा [3]धनदावरजेन ॥ १ ॥
या मिलिता बलशालिना जितवालिना सखि[4] ॥ ध्रुवपदम् ॥

[5]अतुलितबलकपिकलभरथेन
न तपति सा दशवदनसुतेन ॥ २ ॥

करतलविलसदमोघशरेण
चरति न सा खलु [6]वालिरवेण ॥ ३ ॥

अविरतकरधृतचापलतेन
द्रवति न सा हि सुबाहुशतेन ॥ ४ ॥

---

1 जयलक्ष्म्या साकं क्रीडारतस्य राघवस्यानागमनेन निर्विण्णात्मानं आश्वासयति । शार्दूलविक्रीडितं छन्दः ॥

2 अत्र सीता, यतः शत्रवः जयलक्ष्मीवरणे हीना अशक्ताश्च बभूवुरतो बलाधिकं राघवमेव सा वरयामासेति तस्य शौर्योत्कर्षमुक्तिचातुर्येण निरूपयति । रावणवधानन्तर प्राप्तस्यास्य प्रसङ्गस्य सीतोक्तिभिरत्र सङ्गतिस्तु संस्मृत्येति भाव्यम् । अत्राष्टपद्यां न चलतीत्यदिषु किमिति प्रश्नो योजनीयः ।

3 धनदावरजो रावणः

4 अत्र 'या मिलिना' इति पुनरावर्तनीम् ।

5 या मिलिता बलशालिनेति सर्वत्र पूर्वार्द्धे योजनीयम् ।

6 वापितरेण इति मातृकापाठः ।

शिततरवरकरवालधरेण
प्रतपति सा [1]न विराधशरेण ॥ ५ ॥

शरगणभरितनिषङ्गयुतेन
स्फुरति[2] न सा चतुरङ्गकृतेन ॥ ६ ॥

नयननलिनरुचितरवदनेन
भयमुपयाति न सा मदनेन ॥ ७ ॥

रामकवेरिदमुदितमुदारम् ।
रमयतु रसिकहृदम्बुजवारम् ॥ ८ ॥

। इति षोडश्यष्टपदी ।

[3]स्वच्छन्दं विजयेन्दिरामनुभवन् प्रच्छन्नवेषप्रियः
स्वच्छायामनुवर्तिनीमहह मां तुच्छामयं मन्यते ।
इच्छा तन्मुखदर्शने पुनरिहागच्छेत्कथं वा न चे-
न्मच्छोकं जगतीतले तदितरः कश्छेत्तुमुत्कण्ठते ॥ ५८ ॥

[4]ज्ञातं तच्चरितं मया सखि वने मत्प्रेयसानुष्ठितं
दिष्टया सम्प्रति विष्टपत्रयमपि व्याप्नुत्य यद्गीयते ।
हित्वा मां सहसा परां जयरमामाभुज्य राज्यश्रिया
साकं क्रीडति बाढमेव नितरामद्यापि यन्नागतः ॥ ५९ ॥

[5]अद्यायमुद्यतधनुर्गुणझङ्क्रियाभि
रङ्गेषु मे क्षिपति बाणगणाननङ्गः ।
चन्द्रोऽपि चन्दनगिरीन्द्रसमीरबन्धु-
श्चण्डांशुवद्दहति हा कथमंशुजालैः ॥ ६० ॥

---

1 विराध धरेणेति मातृकापाठः ।

2 हसान तुरङ्गकृतेनेति मातृकापाठः ।

3 सर्वथा रामस्यानागमने सम्भवनीयं कष्टमुद्भाव्य शोचति । शार्दूलविक्रीडितं छन्दः ।

4 रामस्यानागमने जयलक्ष्मीसन्निधिरेव कारणमिति मत्वा तस्य पूर्वचरितमनुचिन्त्य दुःखभागिनी भवति । शार्दूलविक्रीडितं छन्दः ।

5 रामविरहानलतप्ता सीता मन्मथचन्द्रचेष्टाया असहनीयतां प्रदर्शयति । वसन्ततिलका छन्दः ॥

[1]प्रचुरशुकमुखोद्यद्गर्वसर्वङ्कषाणां
प्रणयकुपितकान्तामानहस्त्यङ्कुशानाम्।
कुसुमविशिखडम्बव्याघ्रजाग्रन्नखानां
व्यथयति हृदयं मे मञ्जरी किंशुकानाम् ॥ ६१ ॥

[2]रतिकरतलगुञ्जन्मञ्जुवीणारवो वा
रतिपतिभुजवल्गच्चापकज्यारवो वा।
प्रियविरहितकान्ताकर्णहालाहलो वा
प्रियसखि मदभृङ्गीसङ्घकोलाहलो वा ॥ ६२ ॥

[3]मदान्धदशकन्धरद्विरदकुम्भसम्भेदनं
व्यधादशनिसप्रभैर्नखशिलीमुखैर्यः स्वयम्।
मुदा विहरतीह यः खलु सतां मनः कानने
मदाशयगुहाशयो भवतु कोऽप्यसौ केसरी ॥ ६३ ॥

इति श्रीरामचन्द्रचरणराजीवराजहंसायमानमानसघनपुररामकवि-विरचिते सङ्गीतराघवे महाकाव्ये चतुर्थःसर्गः।

---

1 वर्णसाम्यात्किंशुकशुकमुखयोर्गर्वः। मालिनी छन्दः।

2 मदभृङ्गीकोलाहलस्यैव रतिकरतलगतवीणादिरूपेण संशयभावापन्नत्वम्। मालिनी छन्दः।

3 अत्र सर्गान्तं मङ्गलमाचरति। पृथ्वी छन्दः॥

पञ्चमः सर्गः

अथ सा कथमपि रात्रिं नीत्वायातं प्रभातवेलायाम्।
विजयरमापरिणीतं नाथं सीता निरीक्ष्य[1] न जगाद ॥ ६४॥

अष्टपदी—१७

पन्तुवराळीरागेण गीयते।

[2]अञ्च मयि सारमनुरागमपकञ्चुकं
त्वमिह समये मदनुरूपम्।
एहि सीते दयासारसीते
क्वणितमणिनूपुरविहारं प्रिये ॥ १ ॥ एहि सीते ॥ ध्रुवपदम् ॥

दशवदनभञ्जनं प्रियतम[3]ममुं जनं
मैथिलि विलोकय सलीलम्।
दशनरुचिकौमुदीं विशदय वियन्नदीं
हरतु मम तापमतिवेलं प्रिये ॥ २ ॥ एहि सीते

रुचिविजितखञ्जनं मन हृदयरञ्जनं
चलय नयनाञ्चलमुदारम्।
[4]अचिरमिदमम्बरं वहतु परिलम्बित
मपारमणितोरणविहारं प्रिये ॥ ३ ॥ एहि सीते

---

1 निजगादेति मातृकापाठस्वीकारे उत्तरत्रदृश्यमानं रामवचनमसङ्गतं भवेदिति 'न जगादेति पाठः परिवर्तितः। सीता मानिनी रामं निरीक्ष्यापि अन्यापरिणीतं' ज्ञात्वा न जगादेति भाव्यम्।

2 अञ्च मयि सारमनुरामयकञ्चुकं तमिहेति मातृकापाठे अर्थः स्फुटो न भवति।

3 ममुञ्चनं

4 अम्बरमिदं परिलम्बितं भवतु। रत्यर्थं विगलितवसना भवेत्यर्थः।

विकसय सुखाय मम देवि तव लोचन
सरोजयुगलाञ्चलममोघम्।
शुकमधुरवाणि करवाणि च तवाञ्जलिं
रचय वचनामृतरसौघं प्रिये ॥४॥ एहि सीते

सुतनु मधुरस्मिते स्मरपरवशोऽस्मि ते
दर्शय मनोहरविहारम्।
धृतकनककार्मुके त्वयि सततकामुके
मयि कुरु कृपारसमपारं प्रिये ॥५॥ एहि सीते

अयि रमणि देहि वैदेहि परिरम्भणं
घनकुचविलोलतरहारम्।
मयि सुदति सम्प्रति प्रसभमतिवेलय
प्रथमपरिगणितरसपूरं प्रिये ॥६॥ एहि सीते

अलघुमधुगुप्तये किल मदुपभुक्तये
[1]चुम्बनकृता पि च विनिद्रा।
विलसतु तवाधरे बिम्बफलसोदरे
क्षतरचितरुचि[2]रुचितमुद्रा प्रिये ॥७॥ एहि सीते

[3]. . . . .
. . . .।
विदुषां पुङ्गवदिव्यचारुतरं
विदधातु विलासमतीव पवित्रम् ॥८॥

इति सप्तदश्यष्टपदी

---

1 चुम्बनकृतामपि विनिद्रेति मातृकापाठः।
2 रचितुमुद्रा द्रिये इति मातृकापाठः।
3 अत्र पूर्वार्द्धः त्रुटित इति भाति। कवेर्नाम निरूपणात्मको भवेत्पूर्वभागः।

[1]यतस्ते व्यत्यस्तं [2]प्रविदितमिदं पीतवसनं
मणीहारस्तारानिकरपरिपन्थी शिथिलितः ।
इमे तावन्नेत्रे घुसृणरसमित्रे तदधुना
त्वयि स्पष्टीभूता प्रिय जयरमाखेलनकलाः ॥ ६५ ॥

[3]मुखं विलुलितालकं श्रमजलार्द्रगण्डस्थलं
विदूषितविशेषकं विगतरागबिम्बाधरम् ।
विमर्दितमुरःस्थलं विधुतचन्दनं नाथ ते
तदद्य विजयेन्दिरामनुगतोऽसि किं मां विना ॥ ६६ ॥

[4]दरहसिततरङ्गैर्दुग्धधारान्तरङ्गै-
र्मुदमवनिसुताया मानसे या व्यतानीत् ।
सजलजलदनीला मा सुवर्णाभचेला
विलसतु हृदये नः कापि कारुण्यमूर्तिः ॥ ६७ ॥

[5]अथ तामतनुविभग्नां नवरसमग्नां सरोषमुद्विग्नाम् ।
सपदि सखी सविलासं मधुरवचोभिर्व्यबोधयत्सीताम् ॥ ६८ ॥

---

1 उत्तरत्र श्लोकाभ्यां खण्डितानायिका निरूप्यते। नक्षत्रसमूहादभ्यधिकशोभनस्य मणीहारस्य शैथिल्यकारणं आलिङ्गनादिकमेवेत्यर्थः। घुसृणरसः कुङ्कुमरसः तद्वर्णसदृशे नेत्रे तवेत्यनेन रात्रिजागरणादिकं स्पष्टं भवति। शिखरिणी छन्दः।

2 प्रमुदितं इति मातृकापाठः।

3 भुक्तान्यस्त्रीकस्य लक्षणान्युद्घाटय रामं पृच्छति। पृथ्वी छन्दः।

4 दुग्धधाराधवलैर्हसितैरिति तात्पर्यम्। हासस्य धवलवर्णत्वात्। मालिनी छन्दः।

5 अत्र कलहान्तरिता नायिकावर्ण्यते। प्रणयकोपभीतं नायकं अवधार्य पश्चात्तप्तां सीतां सखी सान्त्वयति॥

अष्टपदी—१८

मध्यमावतीरागेण गीयते।

मा विफलीकुरु सरसवसन्तम्
देवि विलोकय पतिमिह सन्तम्   ॥ १ ॥
[1]राघवे कुरु सति परमनुरागमये   ॥ ध्रुवपदम् ॥

न कुरु विलम्बनमभिसर रामम्
सखि सहसा परिपूरय कामम्   ॥ २ ॥

अयि सति मनसिजविजयपताके
प्रियमनुरञ्जय भुवि लोके   ॥ ३ ॥

सुतनु[2] विजहिहि विषादम्
पतिमिह लालय कलय विनोदम्   ॥ ४ ॥

[3]बिम्बफलाभमिमं मधुमधुरम्
निम्बफलीकुरुषे कथमधरम्   ॥ ५ ॥

व्रज सखि कुञ्जगृहं [4–5]परितापम्
त्यज, भज निजपतिमिममनुरूपम्   ॥ ६ ॥

सखि तव पादकमलमवलम्बे
सुखय पतिं [6]मुखजितशशिबिम्बे[7]   ॥ ७ ॥

॥ इति अष्टादश्यष्टपदी ॥

---

1 राघवे इति त्रिवारं मातृकायां दृश्यते।

2 विजहीहीति मातृकापाठः।

3 बिम्बफलाभस्याधरस्य निम्बफलीकरणं नाम चुम्बनाद्यभावाद्व्यर्थीकरणमिति ज्ञेयम् ।

4 परितापं त्यजेत्युत्तरार्धेणान्वयः ।

5 परिताला इति मातृकापाठः   6 मुखचित इति मातृकापाठः ।

7 अत्र सप्तैव पदानि दृश्यन्ते ।

[1]मद्भावयं मधुसारतोऽपि मधुरं प्रायस्तवैव प्रियं
यद्याकर्ण्य पुनर्न यासि सहसा कुञ्जालयं मञ्जुलम् ।
तत्तादृग्गुणमञ्जरीपरिमलं कान्तं वसन्तं विना
मुग्धे कोकिलवाणि तेऽद्य विभवस्सोऽयं मुधा सम्भ्रमः ॥ ६९ ॥

तत्रैव कुञ्जगृहसीम्नि चिरादासीम-
कामाशुगासहतयेव शनैस्समेत्य ।
तामिन्दुसुन्दरमुखीं स सखीसमक्ष-
मिक्ष्वाकुवंशतनयस्सनयं जगाद ॥ ७० ॥

---

1 आत्मनो हितकरं वाक्यमप्यश्रृण्वन्तीं सोवां सख्याह । शार्दूलविक्रीडितं छन्दः ।

अष्टपदी—१९

मुखारिरागेण गीयते ।

पञ्चशरपातकी शरहतिमहैतुकीं
विरचयति मुहुरपि सकोपम् ।
[1]अत्र मयि शिथिलितचन्दनसारमुरः
स्थलविशदवरायुधघातम् ॥
[2]कथयति मम समुदग्रतदीयनखाग्रकृतक्षतजातम् ॥ १ ॥

[3]याहि राघव या प्रिया तव मदयति हृदयमवेलम् ।
तामिह विजयरमामनुरञ्जय मानद वञ्चनयालम् ॥ ध्रुवपदम् ॥

भुजयुगमगरुमृगीमदसौरभशेषितमेतदुदारम्
विजयरमापरिरम्भणसम्भ्रममिह मम शंसति धीरम् ॥ २ ॥

वपुरपि विपुलपुलककलितं तव कितव घनाघननीलम् ।
[4]उपदिशतीह तदीयसमागमसुखवशतामतिवेलम् ॥ ३ ॥

सकलमिदं भवदङ्गमिहाङ्गरजोभरधूसरभासम् ।
प्रकटयतीह तदीयकरच्युतनवपटवासविलासम् ॥ ४ ॥

इदमपि तव हृदयं क्षतजद्रवमुद्रितकोकनदाभम् ।
वदति तदीयपदार्पणसक्तविराजदलक्तकशोभम् ॥ ५ ॥

[5]वसनमिदं खुरलीपरिशीलनखेलनमसृणितरागम् ।
विशदयतीह तदीयघनस्तनसम्भृतघुसृणपरागम् ॥ ६ ॥

---

1 अत्र वृत्तभङ्गः मात्रावैषम्याद् दृश्यते। उरस्तवेति मातृकापाठः। पञ्चशरे इत्यादिकमारभ्य वरायुधघातमित्यन्तो भागः राघवस्य वचनम् ॥

2 इयं सीताया उक्तिः ।

3 अस्यामष्टपद्यां खण्डितानायिकालक्षणवत्त्वं सीतायाः वर्ण्यते ।

4 प्रपदिशशीहेति मातृकापाठः ।

5 खुरलीपरिशीलनं युद्धव्यायाम इत्यर्थः । घुसृणपरागः कुङ्कुमचूर्णम् ।

वदनमिदं विधुबिम्बविडम्बि धृदुत्तमजलकणजालम् ।
वदति तदीयसमागमसमरसमयसमरसमयशीलम् ॥ ७ ॥

[1]श्रीरामकविरचितं सततं रघुघनपुरनिवासि
नरसिंहदेवकुमाररामकविभणितमभिरामम् ।
जनयतु विलासमनिशम् ।
रसिकविबुधमनसि सुललितममृतमिव निकामं प्रिये ॥ ८ ॥

॥ इति एकोनविंशतितमाष्टपदी ॥

[2]महावंशोदभूतामधिगतगुणामद्य भवतीं
धनुर्वल्लीं मन्ये ननु जनकराजन्यतनये ।
असौ यामासाद्य प्रसभनिशितानेव विशिखान्
कटाक्षव्याक्षेपान् क्षिपति मयि साक्षाद्रतिपतिः ॥ ७१ ॥

[3]रम्भास्तम्भकदम्बडम्भविहसद्रम्भीरिमाडम्बरं
किं भेजे करभोरु सिन्धुरकराद्वैतं त्वदूरुद्वयम् ।
यद्वा यौवनकानने विचरतः किं दर्पवद्दन्तिनः
कन्दर्पस्य सदा विहारवसतेरालानमालक्ष्यते ॥ ७२ ॥

[4]मुखं सरसिजायते रदपटः प्रवालायते
दृगुत्पलदलायते स्मितरुचि[5]र्मधूकायते ।
लताङ्गि मृदुनासिका नवतिलप्रसूनायते
तथापि कथमद्य ते मयि वचः शलाकायते ॥ ७३ ॥

---

1 अस्यामष्टपद्यां मात्रान्यूनाधिक्यसम्भूतो वृत्तभङ्गः दृश्यते ॥

2 रामकर्तृकोऽनुनयः एभिः पञ्चभिः पद्यैः वर्ण्यते । महावंशः, सीतापक्षे जनकवंशः धनुःपक्षे वेणुवंशः । अधिगतगुणेति धनुःपक्षे सिञ्जिनीयुक्तइत्यर्थः । सीतैव धनूरूपा तत्कटाक्षाश्च बाणा इति विदितं भवति । शिखरिणी छन्दः ।

3 सिन्धुरो गजः तस्य शुण्डासदृशमूरुयुग्ममथवा यौवनकाननसञ्चारिणो दृप्तकन्दर्पगजस्य बन्धनस्तम्भो वेत्याशङ्कते । शार्दूलविक्रीडितं छन्दः ॥

4 मधूका पुष्पविशेषः । पृथ्वीछन्दः ।

5 र्मधुरायते इति मातृकापाठः ।

इहैव[1] विचिकित्सनां परिजहीहि वैदेहि मां
कटाक्षय दयारसप्रसरशैत्यवत्या दृशा।
तथा स्मितमरीचिभिर्मृदुवचस्सुधावीचिभि-
र्निकाममदनाकुलं स्नपय मामनन्यं प्रिये ॥७४॥

त्वद्वक्त्रेण समं हिमांशुरुदितः स्फीतः कलावैभवैः
साकूतस्मितवल्लितेन च समं प्रोन्मीलिता चन्द्रिका।[2]
मद्दौष्ट्येन समस्तमस्तमयितं तादृक् निरस्तं प्रिये
क्षीरोदेन समं स मारसमरारम्भः समुज्जृम्भताम् ॥७५॥

इति परमनुनीय तां मृगाक्षीं
गतवति कुञ्जगृहं रघुप्रवीरे।
[3]धृतमहितविभूषणां सलीलं
कथितवती मिथिलेन्द्रजां तदाली ॥७६॥

---

1 अन्यस्त्रीसङ्गशङ्काजनितसंशयो विचिकित्सा। तां त्यजेत्यर्थः। प्रसरः, प्रवाहः। पृथ्वी छन्दः।

2 प्रोन्मीलिताश्चन्द्रिकाः इति मातृकापाठः चन्द्रिकाबाहुल्याभावान्न समीचीनो दृश्यते।

3 महितविभूषणा, अनर्घ्यालङ्कारवती। पुष्पिताग्रा छन्दः।

अष्टपदी—२०

कल्याणीरागेण गीयते।

[1]सीते जितरावणमिममुररीकुरु भूसुते॥

॥ध्रुवपदम्॥

विततलताशतसंवृतपदमिममुपसर सरसरसालम्।
वितथममुं सखि मा कुरु कोकिलकलरवसुललितकालम् ॥१॥

अभिसर चरणरणन्मणिनूपुरसहचरकेलिमरालम्।
निभृतनितम्बकुचे परिरम्भय पतिमिह शिथिलितचोलम् ॥२॥

करधृतकनकशरासनमपि [2–3]सुमशरमवशीकृतमेनम्।
सरसमधुरमृदुवचनचमत्कृतिरचनमुपेहि त्वमेनम् ॥३॥

मृदुमधुरस्मितरुचिरुचिरं सखि तावकमुखशशिबिम्बम्।
सुदति समुन्नय तन्नयने सुखमनुभवतामविलम्बम् ॥४॥

चलय सलीलमपाङ्गमरीचिसुधारसवीचिमवेलम्।
कलयतु सा तमिमं कुसुमायुधसमरसमुद्धतशीलम् ॥५॥

अयि शशिमुखि दरहासमरीचिमुदञ्चय किञ्चिदुदारम्।
प्रियहृदयेन्दुशिला भुवि जनयतु सा प्रणयामृतधाराम् ॥६॥

सखि रयचलितनितम्बलसन्मणिमयरशनागुणमेतम्।
मुखरय मकरनिकेतनसङ्गरकृतजयडिण्डिमभूतम् ॥७॥

---

1 अनुनयसन्तुष्टां सीतां प्रति सखी वल्लभानुसरणे प्रचोदयति।

2 अवशीकृतं परनायिकावशेऽप्राप्तमिति ज्ञेयम्:।

3 सुमशरमिव शीकृतमेन मिति मातृकापाठः॥

[1]श्रीरामकविसमुदीरितमिदमिह सूक्तिमौक्तिकमणिवारम् ।
[2]धीरजनालिरलङ्कुरुतादधिगलमभिनवमिव हारम् ॥ ८ ॥

॥ इति विंशतितमाष्टपदी ॥

[3]किं मौनेन सखि प्रसीद सहसा किं मद्वचोवैखरीं
मोघीकर्तुमिहेच्छसि प्रियसखी कान्यास्ति मान्या तव ।
कोपं मुञ्च दयामुदञ्च दयिते पञ्चास्त्रशस्त्रार्दिते
किञ्चोद्वेलदृगञ्चलामृतरसैः सिञ्च स्मिताम्रेडितैः ॥ ७७ ॥

[4]कृपारससुशीतलालसनिमेषनेत्राञ्चलो
जपारुणरदांशुकस्तिलसुमोल्लसन्नासिकः ।
क्षपाकरनिभाननः सकललोकसम्मोहनः
स पातु रघुनन्दनः पवननन्दनस्यन्दनः ॥ ७८ ॥

[5]उद्यन्मुखेन्दुमधुरस्मितचन्द्रिकाभि-
रुद्वेल्लितस्मरविलासमहार्णवस्य ।
श्रीराघवस्य सविधेऽथ विदेहपुत्रीं
सापत्रपां सवयसी सरसं जगाद ॥ ७९ ॥

---

1 अत्र मात्राधिक्यं दृश्यते । सूक्तिरूपैर्मौक्तिकैर्निर्मितं मणिमयमदिरापात्रमित्यर्थः ।
2 धीरजनालिमलङ्कुरुतामधि इति मातृकापाठः ॥
3 स्नेहातिशियप्रदर्शनपूर्वकं सखी सीतां राघवमनुसर्तुं प्रेरयति । शार्दूलविक्रीडितं छन्दः ।
4 अध्यायान्ते मङ्गलमाचरति । पृथ्वी छन्दः ।
5 राघवेन समं रन्तुं प्रेरयन्ता सखी सीतामाह उत्तरत्र अष्टपद्या । अत्र वसन्ततिलका छन्दः ।

अष्टपदी—२१

[1]रागः । तालः ॥

विहर सीते विहर सीते विहर सीते राघवसमेता ॥ ध्रुवपदम् ॥

सहकारसहकृतनिकुञ्जनिलये ।
इह विपुलनयनजितनवकुवलये ॥ १ ॥

बहुलसुरभिलमृदुलकुसुमगुम्भे
इह विलसदूरूजितकनकरम्भे[2] ॥ २ ॥

वहदमलकुसुमरसललितगन्धे
इह विलसदलकरुचिजितमिलिन्दे[3] ॥ ३ ॥

विहरदलिकुलकलनिनादगाने
इह गतिविलासजितहंसयाने ॥ ४ ॥

विहितकलकण्ठकुलकलनिनादे[4]
इह मदनकदनसमुदितविनोदे ॥ ५ ॥

[5]तुहिनकरकान्तमणिखचितमञ्चे
इह विदितमदनलीलाप्रपञ्चे ॥ ६ ॥

[6]मदितकलहंसगरुदमलतल्पे ।
इह सितसुधामधुमधुरजल्पे ॥ ७ ॥

---

1 अत्र न कोऽपि रागः मातृकायां योजितो वर्तते । अत्राष्टपद्यां सर्वत्रापि पदपूर्वभागः कुञ्जविशेषणानि उत्तरभागः सीताविशेषणानीति ज्ञेयम् ।

2 कनकरम्भापदेन उर्वोः गौरकान्तिमत्ता व्यज्यते ।

3 मिलिन्दा भ्रमराः ।

4 निदाने इति मातृकापाठः ।

5 तुहिनकरकान्तमणिश्चन्द्रकान्तमणिः ।

6 गरुत्पक्षः । हंसतूलिकातल्पयुक्ते उद्यान इत्यर्थः ।

[1]वाहिनीपतिदेवनृपसमाजे
व्याहरति रामकविराजराजे ॥ ८ ॥

॥ इति एकविंशतितमाष्टपदी ॥

[2]साकूतस्मितकान्तिलेशविवशे प्राणेश्वरे प्रायशः
प्रीतिं तन्वि विधेहि नन्विह मुदा वैदेहि याह्यन्तिकम् ।
आनन्दं जनयाशु मञ्जुलमणीमञ्जीरसिञ्जारवै–
राश्लेषं कुरु चारुकङ्कणझणत्कारं भुजाभ्यामपि ॥ ८० ॥

हे वैदेहि विधेहि मोहनधियं मा वैमनस्यं कृथाः
[3]किं वैयात्यमुपेत्य नाद्य[4] रमसे त्वय्येव लग्नाशये ।
भावैस्तैः सविलासहासमविनाभावैकबद्धस्पृहै–
[5]स्त्वद्वैदुष्यमिह प्रपञ्चय परं पञ्चास्त्रशास्त्रोदितम् ॥ ८१ ॥

वक्त्रं शीतकरायतां स्मितरुचिर्ज्योत्स्नावितानायता–
मालोकस्तुहिनायतां तव वचः पीयूषधारायताम् ।
तस्यापि त्वदवेक्षणे नयनयोर्युग्मं चकोरायता–
[6]मद्योद्वेलमनोजकेलिविभवः क्षीरोदपूरायताम् ॥ ८२ ॥

[7]ऊरीकृतसखीसूक्तिर्दूरीकृतदुरूहिता ।
झलंझलितमञ्जीरं सा जगाम प्रियान्तिकम् ॥ ८३ ॥

---

1 वाहिनीपतिदेवोऽत्र रामकवेराश्रयदो देवराजसेनानीः स्मर्यते ।

2 राघवेन सह विमानं रन्तुं शिक्षयति सख्यत्र । शार्दूलविक्रीडितं छन्दः ।

3 वैयात्यं सुरते निर्लज्जाप्रकटनम् । का वैयात्यमित्यादिमातृकापाठे अर्थः स्फुटो न भवति ॥ शार्दूलविक्रीडितं छन्दः ।

4 रमते इति मातृकापाठः 5 स्तद्वैदुष्यमिति मातृकापाठः ।

6 उद्वेलमनोजकेलिविभवः अतिशयितकामक्रीडावैभवः । शार्दूलविक्रीडितं छन्दः ।

7 राघवेन सममन्यस्त्रीरमणविषयको दुरूहः तदभाववतीत्यर्थः । झलंझलितेत्यनुकरण शब्दः ।

अष्टपदी—२२

॥ रेगुप्तिरागेण गीयते ॥

[1]अथ रघुपतिमप्रतिमं निजकरधृतशरधनुरभिरामम् ।
सा ददर्श दयितं जगतां वरमङ्गविनिर्जितकामम् ॥ ध्रुवपदम् ॥

विमलमणिप्रकराञ्चितकाञ्चनमञ्चतले निवसन्तम् ।
[2]अमरधराधरवरशिखरे नवजलधरमिव विलसन्तम् ॥ १ ॥

[3]परिवृतदिव्यदुकूलसमुल्लसदवयवकान्तिविशेषम् ।
परिपतदमलतुषारपरीवृतमरकतशिखरिनिकाशम् ॥ २ ॥

वदनसुधाकिरणाश्रयणाय समागतमिव तिमिरौघम् ।
मृदुतरकचनिचयं दधतं धरणीधरमिव धृतमेघम् ॥ ३ ॥

मधुरतरस्मितरुचिसचिवायितहारभरेण विभान्तम् ।
विधुकरविलसदुडुप्रकराञ्चितशारदवियदिव कान्तम् ॥ ४ ॥

सुललितकुण्डलकान्तिसगर्भ्यदरस्मितगर्भकपोलम् ।
विलुलितकुन्तलशोभितमृगमदतिलककलङ्कितफालम् ॥ ५ ॥

[4]परिमलमिलदलिकुलविलसन्नवमालामुरसि दधानम् ।
तरलसितासितसरिदनुरञ्चितजलनिधिमनु विदधानम् ॥ ६ ॥

समदकरीन्द्रकरायतवृत्तभुजं भजतामनुरूपम् ।
शमधनजनमनसामपि मोहकरं परमनुपमरूपम् ॥ ७ ॥

---

1 'पतिदुप्रतिमं धृतशरधनुरभिरामम्' इति मातृकापाठेऽर्थः स्फुटो न भवति । अक्षरलोपश्च दृश्यते ।

2 अमरधराधरः मेरुपर्वतः ।

3 परिहृत इति मातृकापाठः ।

4 श्यामवर्णे राघवे धवलमालाधारणेन गङ्गायमुनयोः सङ्गम इवाभूदिति तस्य सौन्दर्यं वर्ण्यते ।

श्रीरामकविभणितं भुवि वर्णितराघवमोहनरूपम् ।
[1]नाशयतु प्रसभं पिबतां सकृत्स्वर्णदिजलमिव पापम ॥ ८ ॥

इति द्वाविंशतितमाष्टपदी ॥

प्रियास्यं प्रस्यन्दिस्मितमधुरमिन्दुप्रतिभटं[2]
प्रकाशं पश्यन्त्याः कुवलयदलोदञ्चितदृशः।
तदानीमुल्लोलप्रणयरसकल्लोलचलिता
निपेतुर्नेत्राभ्यामिव विमलहर्षाश्रुकणिकाः ॥ ८४ ॥

[3]विहारव्याजेन प्रसरति निकुञ्जात् परिजने
व्रजन्त्यास्तल्पान्तं जनकतनयायाः प्रतिमुहुः ।
स दृष्ट्वा साकूतस्मितमधुरमास्यं प्रियतम–
स्तदानीमानन्दं परमनुबभूव प्रमुदितः ॥ ८५ ॥

[4]अमुष्याः वक्त्रेन्दोरतिमधुरमन्दस्मितझरी-
परीवाहा[5]न्मोहाम्बुनिधिमधिगत्य प्रियतमः ।
अभूद्व्रीडाव्रीडैरलसविलसन्मुग्धवलनै–
रपाङ्गैः शृङ्गारामृतरसतरङ्गैस्तरलितः ॥ ८६ ॥

ततस्तस्यास्त्रस्यत्तरुणहरिणाक्ष्याः प्रवलितैः
कटाक्षैराश्लिष्ट[6]स्तपनतनयावीचिसचिवैः।
बभौ रामः कामं मदनकदनारम्भसमये
समन्तादालोलैः कुवलयदलैरर्चित इव ॥ ८७ ॥

[7]तदनु मृदुलं तल्पं कल्पप्रसूनविनिर्मितं
स्मरपरवशं प्रेमार्द्रार्द्रं प्रियश्च मुहुर्मुहुः।
प्रकृतितरलैर्व्रीडाजाड्यैर्विलोलदृगञ्चलैः
सदरहसितं सम्पश्यन्तीमुवाच मुदा स ताम् ॥ ८८ ॥

---

1 अत्र मात्राधिक्यं सकृत्स्वर्णेत्यत्र, नदीशब्दस्य ह्रस्वत्वं च वर्तते ॥
2 इन्दुप्रतिभटमिन्दुसदृशमित्यर्थः । शिखरिणी छन्दः ।
3 शिखरिणी छन्दः । 4 शिखरिणी छन्दः ।
5 मोहाम्बुधिगत्य इति मातृकापाठः ।
6 तपनतनया कालिन्दी । शिखरिणी छन्दः । 7 हरिणी छन्दः ।

अष्टपदी—२३

॥ रामक्रियारागेण गीयते ॥

सति सहसा रघुनन्दनम् । [1]मामभिनन्दय सीते ।
॥ ध्रुवपदम् ॥

मणिमयमञ्चतले पदपङ्कजमञ्च परं धरणीसुते ॥
भण रमणीयतरं मयि सम्प्रति सुदति सुधामधुरस्मिते ॥ १ ॥

सुमुखि मुखेन्दुमुदञ्च दृगञ्चलं चलय सलीलमयि प्रिये ।
सुमशरसमरमहाय[2] मनः कुरु तरुणि चिराय मयि प्रिये ॥ २ ॥

सुरभिलमलयजमृगमदरोचनकुङ्कुमपङ्कविलेपम् ।
विरचय करकमलेन विलासिनि शमय मनोभवतापम् ॥ ३ ॥

रदमुकुलेन परं सुरभीकुरु सुदति मनोहरवीटीम् ।
मदयतु सा मां सामि विभेदय रदपट[3]विद्रुमपेटीम् ॥ ४ ॥

प्रियकर[4]मभिसर तं वरवर्णिनि, कर्णरसायनभूतम् ।
अयि कलकण्ठि मया सह सम्प्रति कलय मनोहरगीतम् ॥ ५ ॥

स्मरविशिखेन नखेन[5] विपञ्चीं वादय कोकिलवाणि ।
स्फुरतु तरङ्गितचारुतरस्वरगानरसामृत[6]वाणी ॥ ६ ॥

पृथुलनितम्बकुचे परिरम्भय किं[7]भजसीह विलम्बम् ।
वितर मधूनि[8] पिबामि च भामिनि तव मधुराधरबिम्बम् ॥ ७ ॥

---

1 माद्भुभिनन्दयेति मातृकापाठः ।

2 मवः इति मातृकापाठः; 3 विद्रुव इति मातृकापाठः

4 मतिसरसं इति मातृकापाठः 5 विपञ्चिकां इति मातृकापाठः

6 वेणी इति मातृकापाठः 7 भजसिद्य इति मातृकापाठः

8 विभामि इति मातृकापाठः

रामकवेर्भणितं रसबन्धुरमधुरपदं मृदुगीतम् ।
[1]श्रीमहितं [2]जयतादघहरं रघुनायक[3]वर्णनपूतम् ॥ ८ ॥

॥ इति त्रयोविंशतितमाष्टपदी ॥

अन्योन्यं सरसैरपाङ्गवलनैरुत्पन्नश‍ृङ्गारयो–
व्याहारैर्जयसूचकैस्समरसं क्रीडाविधिं प्राप्तयोः ।
आनन्दाभिगमादवाप्तसकलावाप्यांशयोरेनयोः
सीताराघवयोर[4]नङ्गसमरः कोऽप्यद्भुतोऽभूत्तदा ॥ ८९ ॥

॥ इति रामकविविरचितं गीतराघवं सम्पूर्णम् ॥

---

1 श्रीमहिदं इति मातृकापठः

2 अत्र जयतदघहरं इत्यत्र मात्राधिकयं दृश्यते । 3 सर्वन इति मातृकापाठः

4 अनङ्गसमरः कोऽप्यद्भुतोऽजायत ॥ इति मूलमातृकायामेव पाठान्तरम ॥

सङ्गीतराघवे सयोजिता रागाः ।

१. अहरी	१०. भैरवी
२. कल्याणी	११. मध्यमावती
३. कापी	१२. मालवी
४. काम्बोधी	१३. मुखारी
५. केदारगौलः	१४. रामक्रिया
६. तोडी	१५. रेगुप्तिः
७. देशाक्षी	१६. वसन्तः
८. पन्तुवराळी	१७. शङ्कराभरणः
९. भूपाली	१८. सोराष्ट्रः

सङ्गीताराघवस्य पद-पद्यानुक्रमणिका

अत्र मयि सारमनुराग 43–1
अतिचिरकृततपसम् 7–10
अतुलितबलकपिकलभ 39–2
अथ तामतनुविभ्रमां 44–68
अथ निजकरजालैः 33–48
अथ रघुपतिमप्रतिमं 54–1
अथ सा कथमपि 42–64
अथागतां राघवमन्तरेण 35–54
अथालसाङ्गं समुपेत्य 30–44
अद्य त्वद्विरहज्वरावृततनोः 27–39
अद्यायमुद्यतधनुर्गुणझङ्कियाभिः - 40–60
अधिकचलोचनकुवलयया 18–1
अनिमिषयुवतिकदम्ब 16–1
अन्योन्यं सरसैरपाङ्गवलनैः 57–89
अभिसर चरणरणन्मणि 50–2
अमुष्या वक्त्रेन्दोः 55–86
अयि रजनीयं व्रजति मदीयं 30–7
अयि रमणि देहि वैदेहि 43–6
अयि शशिमुखि दरहास 50–6
अयि सति मनसिजविजयपताके - 45–3
अलघु मधुगुप्तये किल 43–7
अविरतकरघृतचापलतेन 39–4
अहह घनसारपरिमिलित 34–4
इक्ष्वाकूणां कुलजलनिधेः 4–13
इति परमनुनीय तां मृगाक्षीं 49–76
इदमपि तव हृदयं 47–5
इहैव विचिकित्सनां 49–74
उदयति सितरुचिबिम्बे 28–1
उद्यन्मुखेन्दुमधुरस्मित 51–79
उल्लासप्रसरद्दरस्मित 11–16
ऊरीकृतसखीसूक्तिः 53–83
कथमपि वृथैव निवसामि 34–7
कथमपि सखि तामनङ्गभीतां 27–40
कपिमपि विपुलभुजं 7–15
करतलविलसदमोघशरेण 39–3
करधृतकङ्कणभर्ममयोर्मिकया 18–7
करधृतकनकशरासन 10–4,50–3
करलसदसिलतया 6–9
कलयति वेणीमिव स कृपाणीं 38–5
कलशपयोधिगृहे 5–2
कलितयशःफलविमलदुकूला 36–5
कवेरकन्याविलसत् 1–2
काञ्चनधनुषा खलु तद्वपुषा 38–3
कान्तः किं मृगयार्थमुद्यतधनुः 35–52
कान्तस्त्वां तनुमध्यमे 30–43
कामपि कल्पलतां कलकीर 14–6
कामपि कल्पलतां चलदङ्गुलि 14–2
कामपि पक्वफलाधर 14–4
कामपि पुनरुपकण्ठ 14–5
कामपि वृत्तघनस्तबक 14–3
कालिन्दीमिव कालभोगि 22–33
किसलयकराः प्राञ्चद्बिम्बाधरा- 16–24
किं फलं फलपुष्पभार 20–3

किं मौनेन सखि प्रसीद	51–77
कुसुमकलापं बलरिपुचापं	29–4
कुसुमरसासवपानसमेधित	12–4
कुसुमितविविधलताशत	12–1
कृतार्थिततपोवनः	32–47
कृपारससुशीतला	51–78
कोकदम्पतिवर्तुलस्तन	20–6
को वा सम्प्रति मां प्रति	21–29
खरदहनोऽपि परं	7–13
घटयसि धरणिधरैः	8–17
चकचकदूरुपराजित	26–1
चन्दनगिरीन्द्रचर	34–3
चन्दनसारपरीमल	14–1
चरणसरोजदले वहसि	5–4
चलय सलीलमपाङ्ग	50–5
चिरयति बत नाथश्चाटु	34–50
जलधरनीलकलेवर	16–2
जलनिधिविभवविशोषण	10–6
ज्ञातं तच्चरितं मया	40–59
ज्वलति भवद्विरहज्वलने	34–5
ज्वलनशकलमिव	26–4
ततस्तस्यास्त्रस्यत्	55–87
तत्रैव कुञ्जगृहसीम्नि	46–70
तदनु मृदुलं तल्पं	55–88
तव चरितानि सुधामधुराणि	36–6
तादृशीमपहाय हा	30–5
तिमिरनिरासं दिशि दिशि	38–4
तीव्रान् पार्विकशर्वरीकर	21–31
तुहिनकरकान्तमणि	52–6
तोयजनयन परं विरहार्दित	25–7
वद्वक्त्रेण समं हिमांशुः	49–25
दरदलदरविन्दस्यन्दमानं	13–18
दरहसिततरङ्गैः	44–67
दलदरविन्दविनिन्दक	16–4
दलयसि भूतपतेर्धनुः	6–5
दशरथनृपजठरे	5–3
दशवदनभञ्जनं	42–2
दाशरथे करुणारसपूर	24–3
धनुरनुरञ्जितभुजबल	36–1
धरणिसुताधरचुम्बन	10–1
न कुरु विलम्बनमभिसर	45–2
नयननलिनरुचितर	40–7
नवकुवलयमयदामसमूहम्	31–4
नाथः किं सखि साकं	39–57
नाभिसरोजपुटे	5–1
[निवसति] निशि निशि गहने	28–3
पञ्चवटीनिलये	7–14
पञ्चशरपातकी	47–1
पथि परगतिरहितम्	6–7
परिमलमिलदलिकुल	54–6
परिमिलदाशं चम्पककोशं	38–6
परिवृतदिव्यदुकूल	54–2
परिहितकनकवसन	17–7
पुङ्खितशरगणनयनविकासा	36–7
पुरीमेतां ख्यातां जगति	2–7
पृथुकरिकुम्भलसत्कुचकुम्भा	36–2
पृथुलनितम्बकुचे	56–7
पेरिपुररामे संभृतकामे	38–8
प्रचुरशुकमुखोद्यत्	41–61
प्रतिमुहुरिहैव किल	34–5
प्रमुदितकोकिलकलरव	12–2
प्रासूनाशुग एव शम्भुनयन	35–51
प्रियकरमभिसर तं वरवर्णिनि	56–5
प्रियास्यं प्रस्यन्दि	55–84

प्रेमी मौथिलभाषितेषु 22-35
बहुलसुरभिलमृदुल 52-2
बाहा यस्य समस्तभूमिभरणे 3-8
बिम्बफलाभमिमं मधुमधुरं 45-5
भवति कृतविलम्बे 32-46
भवदधरामृतपानविहीना 31-1
भुजपरिरम्भणसम्भ्रमसुखिता 36-6
भुजयुगमगरुमृगीमद 47-2
भृगुसुतगर्वनिबर्हण 10-7
भ्रमरपरीते मधुरसशीते 38-2
मणिमयहार 10-2
मदकलकलभकराभभुजेन 39-1
मदनमतङ्गजकुम्भविजृम्भि 18-2
मदनमदावलनवरदनायित 12-5
मदान्धदशकन्धर 41-63
मदितकलहंस 52-7
मद्वाक्यं मधुसारलोऽपि 46-69
मधुकरनिकरशिरोरुह 18-3
मधुरतरस्मितरुचि 54-4
मधुरविहारे तव कुचभारे 29-5
मन्दं मन्दं मधूलिं 22-32
मरकतमणिमयमञ्चविकल्पे 24-6
मरकतमणिरमणीय 17-6
मल्लीमञ्जुलमञ्जरीमधुझरी 13-19
महावंशोद्भूतां 48-71
महितसुवर्णसवर्ण 18-4
मामनागसमेव 20-1
मा विफलीकुरु सरस 45-1
मिलितरजोभर 31-3
मुकुरविडम्बकगण्ड 10-5
मुखंविलुलितालकं 44-66
मुखं सरसिजायते 48-73
मुञ्चति विशिखमनङ्गे 28-4
मृगमदपङ्कं रचय कलङ्कं 29-3
मृदुतरमपि नवकुवलयहारं 26-3
मृदुमधुरस्मितरुचि 50-4
यतस्ते व्यत्यस्तं प्रविदितमिदं 44-65
यस्मिन् विस्मृतभेदभाव 28-41
या ताम्राधरपल्लवा 22-34
याहि राघव या प्रिया तव 47-2
युधि दशवदनवधे 8-18
रघुपतिदासे रामकवीशे 30-8
रचयति रामकवीन्द्रे 28-5
रतिकरतलगुञ्जन् 41-62
रदमुकुलेन परं सुरभीकुरु 56-5
रम्भास्तम्भकदम्ब 48-72
रामकविप्रसृता भुवि 17-8
रामकविसूक्तिनव 34-8
रामकवेरतितवेलरसार्द्रं 37-8
रामकवेरिदमतिरस 18-8
रामकवेदिमनुपद 15-8
रामकवेरिदमभिनवगीतम् 27-8
रामकवेरिदमुदितमुदारं 25-8, 31-8,-40-8
रामकवेर्भणितं 8-20, 57-8
रामसूरिसमीरितं 21-8
रुचिविजितखञ्जनं 42-3
लताङ्गनालिङ्गन 13-20
लोके जयत्यपि परं 3-12
वक्त्रं शीतकरायतां 53-82
वक्तव्यं किमितः परं 37-55
वदनमिदं विधुबिम्बविडम्बि 48-7
वदनसुधाकिरणाश्रयणाय 54-3
वदनेन्दुमण्डली सा 2-4

वदने मधुरस्मितं प्रसन्नं	37–56	व्यग्रमना घनसौरभलोभ	15-7
वनभुवि शूर्पणखाम्	7–12	व्यालीभिः परिवेष्टितेव	25-37
वनभुवि हतास्मि बत	34–6	व्रज सखि कुञ्जगृहं	45-6
वनमवनाय सताम्	6–8	शमधनजननिवहे प्रणमसि	7-11
वनवनितादरहास	12-3	शमयसि शक्रसुतं	8–16
वनहुतवहमिव विशति	24–4	शरगणभरितनिषङ्गयुतेन	40–6
वपुरपि विपुलपुलक	47–3	शशिकिरणोऽयमिह	33–2
वसनमिदं खुरलीपरिशीलन	47–6	शितितरवरकरवालधरेण	40–5
वसन्ते सातङ्कं	11–17	शिरोगृहपरिस्फुरत्	2–5
वहदमलकुसुमरस	52–3	शीतलमपि मलयाद्रिसमीरं	26–2
वहसि निजाङ्कतले अनिशं	6–6	श्रमजलशीकरनिकरकपोला	31–2
वाहिनीपतिदेवनृपसमाजे	53–8	श्रीजानकीपदरजः	3–10
विकसय सुखाय मम देवि	43–4	श्रीरामकविरचितं	13–8,48–8
विजयवधूटीमिह भुजपीठी	38–1	श्रीरामकविभणितं	55–8
विदलितबहुलमनोरथ	13–7	श्रीरामकविसमुदीरित	11–8,51–8
विदुषां पुङ्गवदिव्यचारुतरं	43–8	श्रीरामे कमलेक्षणे	4–14
विबुधजनावनलोलः	3–9	श्रीवासुदेवचरणस्फुरत्	2–6
विमलमणिप्रकराश्रित	54–1	श्वसति विषीदति	31–5
विलसति शिशिरमयूखे	33–49	श्वसितसमुज्ज्वलदधर	31–6
विलसदशीतगभस्ति	10–3	श्वेतातपत्राननशशिबिम्बा	36–3
विलासो यद्वाचामधरयति	3–11	सकलमिदं भवदङ्ग	47–4
विविधवरायुधगणनखभूषा	36–4	सखि तव पादकमल	45–7
विशदमुदारं नवमणिहारं	29–6	सखि रयचलितनितम्ब	50–7
विसरति मलयजपवने	28–2	सततकरतलविलास	33–1
विहरदलिकुलकलकल	52–4	सति कलकण्ठे सरिदुपकण्ठे	29–1
विहर सीते विहर सीते	52–1	सति सहसा रघुनन्दनम्	56–1
विहाय पुष्पापचयादिविभ्रमं	19–26	सत्रासं वलमानमीननयना	27–38
विहारव्याजेन प्रसरति	55–85	सपदि विमानवरे	8–19
विहितकलकण्ठकुल	52–5	समदकरीन्द्रकरायत	54–7
वैदेही भवदागमोत्सुकतया	32–45	समनरुमायामविसरमायां	38–7
वैदेहीवदनाब्ज	1–1	समुन्मीलन्मल्ली	21–30
वैदेही वदनेन्दुबन्धुर	15–23	सरयूतीरमन्दार	24–36

सरसतमालसमूह	12–6
सरसपचेलिमबिम्ब	16–3
सरसिजरङ्गे नृत्यति भृङ्गे	29–2
सरोरुहलसत्करां	15–22
सा कदा पुनरिन्दुसुन्दर	20–2
साकूतस्मितकान्तिलेश	53–80
सा दयिता भवता रहिता	24–1
सामि निमीलितनयन	31–7
सारामोघापाङ्गधारा	35–53
सा सुधामधुराधरा	20–4
सीतां शीतमयूखबिम्बवदना	19–27
सीते जितरावणम्	50–1
सुतनु मधुरस्मिते	43–5
सुतनु विजहीहि विषादम्	45–4
सुन्दरमतिरसबन्धुर	24–2
सुमुखि मुखेन्दुमुदश्च	56–2
सुरभिलमलयजमृगमद	56–3
सुललितकुण्डलकान्ति	54–5
सुललितमृदुकरपल्लवया	18–6
स्पृहयति न सा हार्दं	17–25
स्मरति सदैव तवानन	26–5
स्मरविशिखेन नखेन	56–6
स्मारं स्मारं स्मरपरवश	30–42
स्मितज्योत्स्नाप्राची	1–3
स्रष्ट्रे पालयते जगन्ति	9–15
स्वच्छन्दं विजयेन्दिरा	40–58
स्वपिति न जात्वपि	27–7
स्वरजितकोकिल	18–5
हन्तायं तपनो नितान्त	21–28
हा प्रिये तव विप्रियं	20–7
हिमरुचिशकलविलास	17–5
हृष्यद्दालरसालमौलि	15–21
हे वैदेहि विधेहि	53–81

शुद्धिपत्रिका

अशुद्धः	शुद्धः	पृष्ठम्	श्लोकः/पदम्
कन्या विलसत्	कन्याविलसत्	१	२
मनमवश्या	मवश्याय	१	३
स्रष्ट्र	स्रष्ट्रे	९	१५
द्धुङ्गी	द्धृङ्गी	१३	१९
धरस्तबक	धराः स्तबक	१६	२४
मृगद	मृगमद	१७	५
दर्पयशरा	दर्पय शरा	२१	३१
दशारथे	दाशरथे	२४	३
तपनोस्रा	तपनोस्र	१५	७
बिहारे	विहारे	२९	५
श्वसित समु	श्वसितसमु	३१	६
दोषकरो	दोषाकरो	३४	५०
भजतिं	भजति	३६	६
विराथ	विराध	४०	५
मघुर	मधुर	४३	४
कृता पि	कृतापि	४३	७
दासीम	दसीम	४६	७०
रम्भण	रम्भण	४७	२
४३–१	४२–१	५६	अश्व मयि

५१ तमे पृष्ठे ७८ तमश्लोकसमाप्त्यनन्तरं पञ्चमसर्गान्तो भवति। तत्रस्थ-सर्गान्तवाक्यमेवं वर्तते।

इति श्रीरामचन्द्रचरणराजीवराजहंसायमानमानसरामकविविरचिते सङ्गीत-राघवे महाकाव्ये पञ्चमःसर्गः।